॥ श्रीजिनाय नमः ॥

( श्रीचारित्रविजयगुरुभ्यो नमः )

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्रीवासुपूज्यचरित्रं ॥ ( भाग छठ्ठो )

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित गुजराती भाषांतरकर्ता पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

( आ ग्रंथना अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक स्वाधिन राख्या छे )

विक्रम संवत १९८४ किमत रु. ४-०-० सने १९२९

# श्रावकोना बार व्रतो उपर बार चारित्रो तैयार छे.

## मूल तथा अन्वय साथे गुजराती भाषांतरवाळां—कागळ नहीं वापरतां कार्ड उपर छापेलां

### ( मूळकर्ता—वर्धमानसूरि )

विक्रमभूपचरित्र ( सम्यक्त्व व्रत उपर ) .... कीं. रु ०॥

सूरचंद्रचरित्र ( अहिंसा व्रतउपर ) .... .... कीं. रु. ०॥।

हंसराजचरित्र ( सत्य व्रतउपर ) .... .... कीं. रु. ०॥।

लक्ष्मीपुंजसार्थवाहचरित्र ( अस्तेय व्रतउपर ) कीं. रु. ०॥।

नागिलचरित्र ( ब्रह्मचर्य व्रतउपर ) .... .... कीं. रु. ०॥।

विद्यापतिचरित्र ( परिग्रहप्रमाण व्रतउपर ) कीं. रु. ०॥।

सिंहश्रेष्ठीचरित्रं ( दिग्विरति व्रतउपर ) .... कीं. रु ०॥

धर्मनृपचरित्र ( भोगोपभोग व्रत उपर ) .... .... कीं. रु. ०॥

सुरसेन महासेन चरित्र ( अनर्थ दंडव्रतउपर ) .... कीं. रु. ०॥

केशरिकेवलिचरित्र ( सामायिक व्रतउपर ) .... कीं. रु. ०॥

सुमित्रमंत्रिचरित्र ( देशावकाशिकव्रते ) .... .... कीं. रु. ०॥

मित्रानंदमंत्रिचरित्र ( पौषध व्रतउपर ) .... .... कीं. रु. ०॥

सुमित्राश्राविकाचरित्रं ( अतिथिसंविभाग व्रतउपर ) कीं. रु. ०॥।

— आ तेर चरित्रो साथे लेनार पासेथी रु. ६) छुटक लेनार पासेथी उपर प्रमाणे —

**लखो—पंडित हीरालाल हंसराज—जामनगर.**

॥ श्रीजिनाय नमः ॥

( श्रीचारित्रविजयगुरुभ्यो नमः )

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ अथ श्री वासुपूज्यचरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा गुजराती भाषांतर कर्ता—पंडित श्रावक हीरालाल हंसराज—जामनगरवाळा

( तृतीयः सर्गः—षष्ठो भागः )

इतश्चारितृणस्तोमे वेगं पवनवद्वहन् । नाम्ना पवनवेगोऽभूद् भूपः पृथ्वीपुरे पुरे ॥ ३६ ॥

अन्वयः—इतश्च अरि तृण स्तोमे पवनवत् वेगं वहन् पृथ्वीपुरे पुरे पवनवेगः नाम्ना भूपः अभूत्. ॥ ३६ ॥

अर्थः—हवे शत्रुओरूपी तृणोनो समूह उडाडी देवामां वायुनीपेठे वेगने धारण करनारो पृथ्वीपुरनामना नगरमां पवनवेगनामे राजा हतो. ॥ ३६ ॥

अखण्डसुकृतः खण्डमिलायाः परिपालयन् । मित्राणामप्यमित्राणामप्यानन्दमदत्त सः ॥ ३७ ॥

अन्वयः—अखंड सुकृतः सः इलायाः खंडं परिपालयन् मित्राणां अपि, अमित्राणां अपि आनंदं अदत्त. ॥ ३७ ॥

अर्थः—अखंड पुण्यशाली एवो ते राजा, पृथ्वीखंडनुं पालन करतोथको मित्रोने तथा शत्रुओने पण आनंद आपवा लाग्यो.

समये व्रतमादाय मुनेः श्रमणसिंहतः । तप्त्वा तीव्रं तपः प्राप स विमानमनुत्तरम् ॥ ३८ ॥

अन्वयः—समये श्रमणसिंहतः मुनेः व्रतं आदाय, तीव्रं तपः तप्त्वा सः अनुत्तरं विमानं प्राप. ॥ ३८ ॥

अर्थः—समय आव्ये श्रमणसिंह नामना मुनिपासे चारित्र लेइने, तथा आकरो तप तपीने ते अनुत्तरविमानमां गयो. ॥ ३८ ॥

इतश्च निश्चलश्रीकं जम्बूद्वीपविभूषणे । दक्षिणे भरतार्धेऽस्मिन्नस्ति विन्ध्यपुरं पुरम् ॥ ३९ ॥

अन्वयः—इतश्च जंबूद्वीप विभूषणे अस्मिन् दक्षिणे भरतार्धे निश्चल श्रीकं विंध्यपुरं पुरं अस्ति. ॥ ३९ ॥

अर्थः—हवे जंबूद्वीपना आभूषणसरखा आ दक्षिण भरतार्धमां निश्चल लक्ष्मीवाळुं विंध्यपुरनामनुं नगर छे. ॥ ३९ ॥

अवन्ध्यशक्तिस्तत्राभूद्विन्ध्यशक्तिरिति प्रभुः । चापं यस्मिन्विशद्विश्वजयश्रीद्वारतां दधौ ॥ ४० ॥

अन्वयः—तत्र अवंध्य शक्तिः विंध्यशक्तिः इति प्रभुः अभूत्, यस्मिन् विशत् जय श्री द्वारतां चापं दधौ. ॥ ४० ॥

अर्थः—त्यां सफळ शक्तिवाळो विंध्यशक्तिनामे राजा हतो, के जेनुं धनुष प्रवेश करती विजयलक्ष्मीना दरवाजापणाने धारण

करतुं हतुं. ॥ ४० ॥

**गम्भीरनीरभ्रमतो यत्प्रतापभरातुराः । उपेत्य यत्कृपाणान्तर्नृपाणां ततयोऽपतन् ॥ ४१ ॥**

अन्वयः—यत्प्रताप भर आतुराः नृपाणां ततयः, यत् कृपाणांतः गंभीर नीर भ्रमतः उपेत्य अपतन्. ॥ ४१ ॥

अर्थः—जेना प्रतापना समूहथी पीडित थयेली राजाओनी श्रेणिओ, जेनी तलवारनी अंदर जलनी भ्रांतिथी आवीने पडती हती.

**रणनश्यदरिश्रेणित्वराभरतिरस्कृतैः । व्यराजि वाजिभिर्यस्य ह्रियेव विनमन्मुखैः ॥ ४२ ॥**

अन्वयः—रण नश्यत् अरिश्रेणि त्वरा भर तिरस्कृतैः, ह्रिया इव विनमत् मुखैः यस्य वाजिभिः व्यराजि. ॥ ४२ ॥

अर्थः—रणसंग्राममांथी नाशी जता शत्रुओना वेगना समूहथी तिरस्कार पामेला, अने तेथी जाणे लज्जावडे नमी जता मुखोवाळा जेना घोडाओ शोभता हता. ॥ ४२ ॥

**अमुं कदाचिदास्थानिस्थितं वेत्रिनिवेदितः । समुपेत्य चरः कश्चिन्नरनाथमजिज्ञपत् ॥ ४३ ॥**

अन्वयः—कदाचित् आस्थानी स्थितं अमुं नरनाथं वेत्रि निवेदितः कश्चित् चरः समुपेत्य अजिज्ञपत्. ॥ ४३ ॥

अर्थः—कोइक दिवसे सभामां बेठेला ते राजाने छडीदारे निवेदन करेलो कोइक दूत पासे आवीने कहेवा लाग्यो के, ॥ ४३ ॥

**इहैव भरतार्धेऽस्ति नाथ जानासि विश्रुतम् । जातं भूपुण्यपाकेन साकेतमिति पत्तनम् ॥ ४४ ॥**

अन्वयः-(हे) नाथ! जानासि, इह एव भरतार्ध-भू पुण्य पाकेन जातं साकेतं इति विश्रुतं पत्तनं अस्ति. ॥ ४४ ॥

अर्थः-हे स्वामी! आप जाणो छोके, आज भरतार्धमां, जाणे पृथ्वीना पुण्यना उदयथी उत्पन्न थयेलुं, साकेतनामनुं प्रख्यात नगर छे. ॥ ४४ ॥

**तत्रास्ति राजा शौर्यश्रीकेलिजङ्गमपर्वतः । पर्वतो नाम संग्रामयशःप्रसरनिर्झरः ॥ ४५ ॥**

अन्वयः-तत्र संग्राम यशः प्रसर निर्झरः, शौर्य श्री केलि जंगम पर्वतः पर्वतः नाम राजा अस्ति. ॥ ४५ ॥

अर्थः-ते नगरमां संग्राममां मळेला यशना विस्ताररूपी झरणाओवाळो, अने शौर्य लक्ष्मीने क्रीडा करवाना जंगम पर्वत सरखो पर्वत नामे राजा छे. ॥ ४५ ॥

**यममृत्युद्वयीधारः कालो यत्खड्गतां दधत् । स्वेच्छया हन्त हन्त्येव हन्तव्यानहतोदयः ॥ ४६ ॥**

अन्वयः-यम मृत्यु द्वयी धारः कालः यत् खड्गतां दधत्, अहत उदयः हंत हंतव्यान् स्वेच्छया हंति एव. ॥ ४६ ॥

अर्थः-यम अने मृत्युरूपी बे धारवाळो काल, जे राजाना खड्गपणाने धारण करीने, अटकाव रहित उदयवाळो थयो थको हणवालायक शत्रुओने स्वेच्छापूर्वक हणेज छे. ॥ ४६ ॥

**रजोभिरश्वपादोत्थैर्गजोत्थैश्च मदाम्बुभिः । यत्सेना भाति संहारसृष्टिकृद्वारिधेरपि ॥ ४७ ॥**

अन्वयः-यत् सेना अश्व पाद उत्थैः रजोभिः, च गजोत्थैः मद अंबुभिः वारिधेः अपि संहार सृष्टिकृत् भाति. ॥ ४७ ॥

अर्थः—जेनी सेना घोडाओना पगोथी उडेली रजवडे, तथा हाथीओना झरता मदजलवडे महासागरनो पण (अनुक्रमे) विनाश अने उत्पत्ति करतीथकी शोभे छे. ॥ ४७ ॥

**राज्यश्रीभाग्यसारं तं दृशैव भृशमीदृशम् । दीनयन्ती प्रिया तस्य वेश्यास्ति गुणमञ्जरी ॥ ४८ ॥**

अन्वयः–राज्य श्री भाग्य सारं ईदृशं तं दृशा एव भृशं दीनयंती गुणमंजरी वेश्या तस्य प्रिया अस्ति. ॥ ४८ ॥

अर्थः–राज्यलक्ष्मीना भाग्यथी उत्तम एवा पण ते राजाने, फक्त चक्षुना कटाक्षथीज अत्यंत घायल करती, एवी गुणमंजरीनामनी वेश्या तेने प्रिय छे. ॥ ४८ ॥

**यां विधाय विधिः पाणी क्षालयामास वारिधौ । तन्मलं तत्र जानामि नानामणिगणच्छलात् ॥ ४९ ॥**

अन्वयः–यां विधाय विधिः वारिधौ पाणी क्षालयामास, तत्र नाना मणि गण च्छलात् तन्मलं, जानामि. ॥ ४९ ॥

अर्थः–जेणीने बनावीने ब्रह्माए महासागरमां पोताना हाथ धोया छे, अने ते महासागरमां विविध प्रकारना मणिओना समूहना मिषथी तेनो मेल पडेलो छे, एम हुं जाणुं छुं. ॥ ४९ ॥

**ईहन्ते हन्त यत्कान्तिविलोकस्मितविस्मयाः । अपि दिक्पतयः सर्वे पर्वतीभावमात्मनि ॥ ५० ॥**

अन्वयः–हंत यत्कांति विलोक स्मित विस्मयाः सर्वे दिक् पतयः अपि आत्मनि पर्वतीभावं इहंते. ॥ ५० ॥

अर्थः—अहो! जेनी कांतिने जोवाथी आश्चर्य पामेला सघळा दिक्पालो पण पोतानेविषे पर्वतपणाने (निश्चलपणाने) इच्छे छे.

**निर्दम्भतत्परीरम्भसंभवत्पुलका मुदम् । तदलंकारसाराधिष्ठानदेव्योऽपि बिभ्रति ॥ ५१ ॥**

अन्वयः—निर्दंभ तत् परीरंभ संभवत् पुलकाः, तत् अलंकार सार अधिष्ठान देव्यः अपि मुदं बिभ्रति. ॥ ५१ ॥

अर्थः—कपटरहित एवां तेणीना आलिंगनथी रोमांचित थयेली, तेणीना मनोहर आभूषणोनी अधिष्ठायिका देवीओ पण आनंद पामे छे. ॥ ५१ ॥

**तयैव कान्तया देव त्वत्तः पर्वतकोऽधिकः । श्रिया सैन्येन रूपाद्यैर्गुणैस्तु त्वं ततोऽधिकः ॥ ५२ ॥**

अन्वयः-(हे) देव ! तया कांतया एव पर्वतकः त्वत्तः अधिकः, तु श्रिया सैन्येन रूप आद्यैः गुणैः त्वं ततः अधिकः. ॥ ५२ ॥

अर्थः—हे स्वामी ! ते स्त्रीथीज ते पर्वतराजा तमाराथी चडीयातो छे, परंतु लक्ष्मी, सैन्य, अने रूप आदिक गुणोवडे तो तमो तेनाथी चडीयाता छो. ॥ ५२

**तयातीव भवान्भाति भवतातीव भाति सा । पृथग्भावेन भवतोर्न श्रीरिन्दुनिशोरिव ॥ ५३ ॥**

अन्वयः-तया भवान् अतीव भाति, सा भवता अतीव भाति, इन्दु निशोः इव भवतोः पृथग्भावेन श्रीः न. ॥ ५३ ॥

अर्थ—तेणीथी तमो अत्यंत शोभो एम छो, अने ते तमाराथी अत्यंत शोभे एम छे, परंतु चंद्र अने रात्रिनीपेठे तमो बन्नेवच्चेनी (ज्यांसुधी) जूदाइ छे, (त्यांसुधी) शोभा थाय तेम नथी. ॥ ५३ ॥

**नरेन्द्रवृन्दवन्द्योऽसि स्वामिन् शक्त्या कयापि तत् । सर्पादिव मणिं तस्मात्तां ग्रहीतुं भवोद्यतः ॥५४॥**

अन्वयः-(हे) स्वामिन् ! नरेंद्र वृंद वंद्यः असि, तत् कया अपि शक्त्या, सर्पात् मणिं इव, तस्मात् तां ग्रहीतुं उद्यतः भव ?
अर्थः—हे स्वामी ! आप तो राजाओना समूहोने नमवालायक छो, माटे कोइ पण शक्तिथी सर्पपासेथी मणिनीपेठे तेनीपासेथी तेणीने लेवाने प्रयत्नवान थाओ ? ॥ ५४ ॥

**इति श्रुत्वाथ हृष्टेन तं सन्मान्य महीभुजा । दौत्याय प्रहितो मन्त्री सभान्तः पर्वतं जगौ ॥ ५५ ॥**

अन्वयः-अथ इति श्रुत्वा हृष्टेन महीभुजा तं सन्मान्य दौत्याय प्रहितः मंत्री सभांतः पर्वतं जगौ. ॥ ५५ ॥
अर्थः—पछी एम सांभळीने खुशी थयेला ते विंध्यशक्तिराजाए तेनो सत्कार करीने, ते (स्त्री मेळववानी) विष्टिमाटे मोकलेलो मंत्री सभानी अंदर बेठेला ते पर्वतराजाने कहेवा लाग्यो के, ॥ ५५ ॥

**कालकूटममित्राणां मित्राणां तु सुधारसः । विन्ध्यशक्तिर्ब्रवीति त्वां मन्मुखेन सखा तव ॥ ५६ ॥**

अन्वयः-अमित्राणां कालकूटं, मित्राणां तु सुधा रसः, तव सखा विंध्यशक्तिः मन्मुखेन त्वां ब्रवीति. ॥ ५६ ॥
अर्थः—शत्रुओने झेरसमान, तथा मित्रोने अमृतरससमान तमारा मित्र विंध्यशक्तिराजा मारां मुखथी तमोने कहेवरावे छे के,

**यस्ते वैरी स मे वैरी यः सुहृन्मे स ते सुहृत् । या ते श्रीः सा ममापि श्रीर्या मे भूः सा तवापि भूः**

अन्वयः-यः ते वैरी, स मे वैरी, यः मे सुहृत्, स ते सुहृत्, या ते श्रीः, सा मम अपि श्रीः, या मे भूः, सा तव अपि भूः.
अर्थः—जे तमारो शत्रु, ते मारो पण शत्रु, जे मारो मित्र, ते तमारो पण मित्र, जे तमारी लक्ष्मी, ते मारी पण लक्ष्मी, अने

जे मारी भूमि, ते तमारी पण भूमि छे. ॥ ५७ ॥

**एवं सौहार्दसंबन्धभासमानैकभावयोः । नैव श्रियि क्रियायां वा विभेदो भृशमावयोः ॥ ५८ ॥**

अन्वयः-एवं सौहार्द संबंध भासमान एक भावयोः आवयोः श्रियि क्रियायां वा भृशं विभेदः न एव. ॥ ५८ ॥

अर्थः—एरीते मित्राइना संबंधथी शोभती ऐक्यतावाळा आपण बन्ने वच्चे लक्ष्मी अथवा कार्यना संबंधमां पण बिलकुल जूदाइ नथीज. ॥ ५८ ॥

**भेदं यदि न देहेऽपि धत्से तच्छेमुषीप्रिय । मह्यं प्रेषय वेगेन गणिकां गुणमञ्जरीम् ॥ ५९ ॥**

अन्वयः—(हे) तत् शेमुषी प्रिय! यदि देहे अपि भेदं न धत्से, मह्यं वेगेन गुणमंजरीं गणिकां प्रेषय? ॥ ५९ ॥

अर्थः—तेवी रीतनीज बुद्धिथी प्रिय एवा हे पर्वतमित्र! जो (आपण बन्नेनां) शरीरमां पण तमो जूदाइ न राखता हो तो, मने (जरा पण) विलंबविना ते गुणमंजरी वेश्याने मोकली आपो? ॥ ५९ ॥

**इत्यस्य वचसा दीप्तः पवनेनेव पावकः । ततान पर्वतस्तीव्रामक्षरालिं स्फुलिङ्गवत् ॥ ६० ॥**

अन्वयः-इति अस्य वचसा, पवनेन पावकः इव, पर्वतः स्फुलिंगवत् तीव्रां अक्षर आलिं ततान. ॥ ६० ॥

अर्थः-एवीरीतनां तेनां वचनथी वायुथी जेम अग्नि, तेम ते पर्वतराजा तणखाओसरखी तीव्र अक्षरोनी श्रेणि विस्तारवा लाग्यो.

**साधु सख्यं त्वयाराद्ध्य दर्शितं विन्ध्यशक्तिना । याचिता जीवितव्यं मे यदसौ गुणमञ्जरी ॥ ६१ ॥**

अन्वयः—अद्य विंध्यशक्तिना चिरात् सर्वं साधु दर्शितं, यत् मे जीवितव्यं असौ गुणमंजरी याचिता. ॥ ६१ ॥

अर्थः—आजे विंध्यशक्तिए घणे काळे मिताइ तो सारी देखाडी! केमके मारां जीवनसरखी आ गुणमंजरीनी तेणे मागणी करी.

**स्वमुखेनैव यद्येतदभणिष्यत्स मे पुरः । अदास्यमुत्तरं तस्य स्वकृपाणमुखेन तत् ॥ ६२ ॥**

अन्वयः—यदि सः मे पुरः स्व मुखेन एव एतत् अभणिष्यत्, तत् तस्य स्व कृपाण मुखेन उत्तरं अदास्यं. ॥ ६२ ॥

अर्थः—कदाच तेणे मारीपासे पाताना मुखथीज आ हकीकत कही होत, तो तेने मारी तलवारनी अणीथीज उत्तर आपत.

**क्रोधाग्निर्वर्धमानो मे धक्ष्यति त्वामपि ध्रुवम् । तत्तूर्णं गच्छ मा यच्छ दूतदारणदुर्यशः ॥ ६३ ॥**

अन्वयः—मे वर्धमानः क्रोध अग्निः त्वां अपि ध्रुवं धक्ष्यति, तत् तूर्णं गच्छ! दूत दारण दुर्यशः मा यच्छ? ॥ ६३ ॥

अर्थः—मारो वृद्धि पामतो क्रोधरूपी अग्नि तने पण खरेखर बाळी नाखशे, माटे तुं तुरत चाल्यो जा? अने दूतने मारीनाखवानो अपजश मने नही आप? ॥ ६३ ॥

**इति कोपिनि भूपेऽसौ वण्ठैः कण्ठे धृतः पुमान् । अपमानात्समधिकं गत्वाख्यद्विन्ध्यशक्तये ॥ ६४ ॥**

अन्वयः—इति भूपे कोपिनि वंठैः कंठे धृतः असौ पुमान्, गत्वा अपमानात् समधिकं विंध्यशक्तये आख्यत्. ॥ ६४ ॥

अर्थः—एरीते ते राजा कोपायमान थवाथी लुच्चा नोकरोए गळुं पकडीने (कहाडी मेलेला) ते दूते (त्यांथी) निकळीने ते अपमानथी पण अधिक वर्णन ते विंध्यशक्तिराजाने कही संभळाव्युं. ॥ ६४ ॥

**तदैव दैवमप्याशु दुर्बलं गणयन्बलात् । चक्रे प्रयाणं राजासौ रजसावरितांम्बरम् ॥ ६५ ॥**

अन्वयः-बलात् दैवं अपि आशु दुर्बलं गणयन् असौ राजा तदा एव रजसा आवरित अंबरं प्रयाणं चक्रे. ॥ ६५ ॥

अर्थः-पछी बलथी दैवने पण तुरत दुर्बल गणतो एवो ते राजा ते समये धूलिथी आकाशने आच्छादित करनारुं (त्यांथी) प्रयाण करवा लाग्यो. ॥ ६५ ॥

**पर्वतोऽपि चमूचारचूर्णीभूताध्वपर्वतः । प्रतिप्रयाणमकरोद्धैर्याब्धिमकरो रयात् ॥ ६६ ॥**

अन्वयः—चमू चार चूर्णीभूत अध्व पर्वतः, धैर्य अब्धि मकरः पर्वतः अपि रयात् प्रतिप्रयाणं अकरोत्. ॥ ६६ ॥

अर्थः-पछी सैन्यना प्रयाणथी चूरेचूरा थइ गया छे पर्वतो जेनाथी, अने धैर्यरूपी महासागरमां मगरसरखा ते पर्वतराजाए पण वेगथी तेनी सामे प्रयाण कर्युं. ॥ ६६ ॥

**चलद्भिः केतुचीराग्रैस्तर्जयन्तौ मिथोऽप्यथ । योद्धुमुत्सङ्गितोत्साहौ तौ सैन्याब्धी समीयतुः ॥ ६७ ॥**

अन्वयः—अथ चलद्भिः केतु चीर अग्रैः मिथः अपि तर्जयंतौ, उत्संगित उत्साहौ तौ सैन्य अब्धी योध्धुं समीयतुः. ॥ ६७ ॥

अर्थः—पछी उडती धजाओना वस्त्रोना अग्र भागथी परस्पर तिरस्कार करता, अने अति उत्साहमां आवेला, ते बन्ने सैन्योरूपी समुद्रो युद्ध माटे आवी पहोंच्यां. ॥ ६७ ॥

अजातजयभङ्गानि क्षणं क्षोणिपयोस्तयोः । अश्वेभरथपत्तीनां द्वन्द्वयुद्धानि जज्ञिरे ॥ ६८ ॥

अन्वयः–क्षणं तयोः क्षोणि पतयोः अजात जय भंगानि, अश्व इभ रथ पत्तीनां द्वंद्व युद्धानि जज्ञिरे. ॥ ६८ ॥

अर्थः–पछी क्षण वारसुधी ते बन्ने राजाओनां हारजीतविनानां घोडा, हाथी, रथ, तथा पायदळनां द्वंद्वयुद्धो थयां. ॥ ६८ ॥

चिरेप्सितायां समरश्रियि संजातसंगतौ । अदर्शि क्षतजं वीरैश्चिरसंचितरागवत् ॥ ६९ ॥

अन्वयः–चिर इप्सितायां समर श्रियि संजात संगतौ वीरैः चिर संचित रागवत् क्षतजं अदर्शि. ॥ ६९ ॥

अर्थः–घणा काळथी इच्छेली संग्रामलक्ष्मीनो समागम थतां शूरवीरोए घणा काळथी एकठा करेला रागसरखुं रुधिर देखाडी आप्युं.

शरीरैर्वीरवाराणामभ्युत्पत्य मुहुर्मुहुः । प्रहाराणां गणः काममापतन्कवलीकृतः ॥ ७०

अन्वयः—वीर वाराणां शरीरैः मुहुः मुहुः अभ्युत्पत्य प्रहाराणां आपतन् गणः कामं कवलीकृतः. ॥ ७० ॥

अर्थः—शूरवीरोना समूहोना शरीरोए वारंवार सामे उछळीने प्रहारोना आवी पडता समूहने खुशीथी कोळीआरूप करी लीधो, अर्थात् झीलीने सहन कर्यो. ॥ ७० ॥

अन्येष्वपि द्विषद्वारप्रहारान्परिपातिनः । स्वस्मिन्नेव भटा ऐच्छँल्लुब्धा इव धनोच्चयान् ॥ ७१ ॥

अन्वयः–लुब्धाः धनोच्चयान् इव, अन्येषु परिपातिनः द्विषत् वार प्रहारान् अपि भटाः स्वस्मिन् एव ऐच्छन्. ॥ ७१ ॥

अर्थः—लोभी माणसो जेम धनना समूहोने इच्छे, तेम बीजाओपर पडता शत्रुसमूहना प्रहारोने पण शूरवीरो पोतापर पडे तो

ठीक, एम इच्छवा लाग्या. ॥ ७१ ॥

अपसृत्यापसृत्याशु प्रधावद्भिर्विरोधिषु । वीरैर्जयश्रियोऽपूरि दोलाकेलिकुतूहलम् ॥ ७२ ॥

अन्वयः—अपसृत्य अपसृत्य आशु विरोधिषु प्रधावद्भिः वीरैः जय श्रियः दोला केलि कुतूहलं अपूरि. ॥ ७२ ॥

अर्थः—पाछा हठीने हठीने एकदम शत्रुओपर त्रुटी पडता शूरवीरो जयलक्ष्मीनी हींडोलापर झूलवानी क्रीडाना कुतुहलने संपूर्ण करवा लाग्या. ॥ ७२ ॥

तुल्य एव प्रबलयोरित्यभूद्बलयोर्जयः । बाह्वोर्बाहुधनस्येव मिथः संधृत्य कर्षतोः ७३ ॥

अन्वयः—बाहु धनस्य मिथः संधृत्य कर्षतोः बाह्वोः इव, प्रबलयोः बलयोः इति तुल्यः एव जयः अभूत्. ॥ ७३ ॥

अर्थः—बाहुबलने धारण करनारा योद्धाना परस्पर पकडीने खेंचाता बन्ने हाथनीपेठे ते बन्ने बलवान सैन्योनो एरीते सरखोज विजय थयो. ॥ ७३ ॥

गर्वात्सर्वाभिसारेण प्रतेने पर्वतस्ततः । उत्तिष्ठमानो मानोर्मिमुक्तमेवारिवारिधिम् ॥ ७४ ॥

अन्वयः—ततः गर्वात् सर्व अभिसारेण उत्तिष्ठमानः पर्वतः अरि वारिधिं मान ऊर्मि मुक्तं एव प्रतेने. ॥ ७४ ॥

अर्थः—पछी गर्वथी सर्व प्रकारना धसाराथी उठेला पर्वत राजाए शत्रुओरूपी महासागरने अभिमानरूपी मोजांओथी रहित कर्यो.

रेजेऽस्त्रैः खण्डशः कुर्वन्वैरिवीरान्पशूनिव । तेजोऽग्निं ज्वालयन्कालः स्वयंपाकव्रतीव सः ॥ ७५ ॥

अन्वयः—तेजः अग्नि ज्वालयन् स्वयंपाक व्रती कालः इव, सः अस्त्रैः पशून् इव वैरि वीरान् खंडशः कुर्वन् रेजे. ॥ ७५ ॥

अर्थः—तेजरूपी अग्निने बालता स्वयंपाक व्रतवाळा कालनीपेठे ते पर्वतराजा शस्त्रोवडे पशुओनीपेठे शत्रुओना सुभटोना टुकडे-टुकडा करतोथको शोभवा लाग्यो. ॥ ७५ ॥

**कुर्वन्संकीर्णकीनाशवदनं कदनं द्विषाम् । अधावत ततः क्रुद्धो युद्धोर्व्यां विन्ध्यराडपि ॥ ७६ ॥**

अन्वयः—ततः संकीर्ण कीनाश वदनं द्विषां कदनं कुर्वन् क्रुद्धः विंध्यराट् अपि युद्ध उर्व्यां अधावत. ॥ ७६ ॥

अर्थः—पछी जेथी यमराजना मुखमां पण संकडामण थाय, एवो शत्रुओनो संहार करतोथको क्रोध पामेलो विंध्यराजा पण युद्धभूमिमां दोडी आव्यो. ॥ ७६ ॥

**मिथः प्रमथिताशेषबलौ प्रबलदोर्बलौ । तर्जयन्तौ भ्रुवैवैतौ गर्जन्तावभिजग्मतुः ॥ ७७ ॥**

अन्वयः—प्रमथित अशेष बलौ, प्रबल दोर्बलौ, भ्रुवा एव मिथः तर्जयंतौ एतौ गर्जंतौ अभिजग्मतुः. ॥ ७७ ॥

अर्थः—कचरी नाखेल छे सर्व सैन्य जेओए एवा, प्रचंड भुजबलवाळा, तथा भ्रुकुटिथीज परस्पर एक बीजानो तिरस्कार करनारा, ते बन्ने राजाओ गर्जना करताथका सामसामे आवी गया. ॥ ७७ ॥

**रथसारथिरथ्यानां मिथो मन्थममन्थरम् । प्रथयित्वा स्थितौ पृथ्व्यां पृथू पृथ्वीधरौ यथा ॥ ७८ ॥**

अन्वयः—यथा पृथू पृथ्वीधरौ, (तथा तौ) मिथः रथ सारथि रथ्यानां अमंथरं मंथं प्रथयित्वा पृथ्व्यां स्थितौ. ॥ ७८ ॥

अर्थः—पछी बे महान् पर्वतोनीपेठे तेओ बन्ने परस्पर रथ, सारथि तथा घोडाओनो घणो कच्चरघाण वाळीने जमीन पर आवीने उभा. ॥ ७८ ॥

**रथान्तरपरिस्पन्दावमन्दानन्दविक्रमौ । युयुधाते क्रुधा तेजस्तेजयन्तौ जयाय तौ ॥ ७९ ॥**

अन्वयः-रथ अंतर परिस्पंदौ, अमंद आनंद विक्रमौ, क्रुधा तेजः तेजयंतौ तौ जयाय युयुधाते. ॥ ७९ ॥

अर्थः—बीजा रथमां बेठेला, तथा अति आनंदयुक्त पराक्रमवाळा, अने क्रोधथी तेजने वधारता एवा तेओ बन्ने विजय माटे लडवा लाग्या. ॥ ७९ ॥

**युक्तं पर्वतको विन्ध्यशक्तिना युधि निर्जितः । चित्रं पलायमानोऽपि स जिगाय प्रभञ्जनम् ॥ ८० ॥**

अन्वयः-विंध्यशक्तिना युधि पर्वतकः निर्जितः युक्तं, चित्रं पलायमानः अपि सः प्रभंजनं जिगाय. ॥ ८० ॥

अर्थः—विंध्यशक्ति राजाए युद्धमां ते पर्वतने जे जीत्यो, ते युक्तज छे, परंतु आश्चर्यनी बिना तो एछे के, (त्यांथी) नाशता एवा तेणे वायुने पण जीती लीधो! ॥ ८० ॥

**जगृहेऽथ महाकुम्भिकुम्भकान्तकुचोज्ज्वला । तस्य श्रीरिव सा विन्ध्यशक्तिना गुणमञ्जरी ॥ ८१ ॥**

अन्वयः-अथ महाकुंभि कुंभकांत कुच उज्ज्वला तस्य श्रीः इव सा गुणमंजरी विंध्यशक्तिना जगृहे. ॥ ८१ ॥

अर्थः-पछी महान् हाथीना कुंभस्थलसरखी मनोहर स्तनोथी शाभिती एवी ते राजानी लक्ष्मीसरखी ते गुणमंजरीने ते विंध्यश-

क्तिराजए ग्रहण करी. ॥ ८१ ॥

**सर्वतः पर्वतः सोऽथ गर्वतः प्रच्युतः कृती । भेजे संभवसूरिभ्यो भवसौरभ्यमुग्व्रतम् ॥ ८२ ॥**

अन्वयः—अथ सर्वतः गर्वतः प्रच्युतः सः कृती पर्वतः संभवसूरिभ्यः भव सौरभ्यमुक् व्रतं भेजे. ॥ ८२ ॥

अर्थः—पछी सर्व प्रकारना गर्वथी रहित थयेला ते कृतार्थ पर्वतराजाए संभवनामना आचार्यपासे संसारनी वासनाने तजनारुं चारित्र ग्रहण कर्युं. ॥ ८२ ॥

**विन्ध्यशक्तिवधे शक्तिर्भवतान्मे भवान्तरे । ईदृग्निदानध्यानेन तेने तेनातुलं तपः ॥ ८३ ॥**

अन्वयः—भवांतरे विंध्यशक्ति वधे मे शक्तिः भवतात्? ईदृग् निदान ध्यानेन तेन अतुलं तपः तेने. ॥ ८३ ॥

अर्थः—भवांतरमां आ विंध्यशक्तिराजानो वध करवामां मारी शक्ति थाओ? एवी रीतना नियाणायुक्त ध्यानथी ते पर्वतराजा अनुपम तप तपवा लाग्यो. ॥ ८३ ॥

**एवं तपः स विक्रीय तक्रैः कामगवीमिव । गृहीत्वानशनं मृत्वा प्रपेदे प्राणतं दिवम् ॥ ८४ ॥**

अन्वयः—एवं तक्रैः काम गवीं इव, तपः विक्रीय सः अनशनं गृहीत्वा, मृत्वा प्राणतं दिवं प्रपेदे. ॥ ८४ ॥

अर्थः—एरीते छाशसाटे कामधेनुनीपेठे तप वेंचीने, ते अनशन लेइ, मृत्यु पामीने प्राणत देवलोकमां गयो. ॥ ८४ ॥

**विन्ध्यशक्तिरपि भ्राम्यन्भवाञ्जन्मनि कुत्रचित् । जिनलिङ्गधरो मृत्वा कल्पवृन्दारकोऽभवत् ॥ ८५ ॥**

अन्वयः-विंध्यशक्तिः अपि भवान् भ्राम्यन् कुत्रचित् जन्मनि जिन लिंगधरः मृत्वा कल्प वृंदारकः अभवत्. ॥ ८५ ॥

अर्थः—पछी ते विंध्यशक्ति राजा पण भवोमां भमतोथको, कोइक जन्ममां जैनलिंग (दीक्षा) धारण करीने, मरण पामी देवलोकमां देव थयो. ॥ ८५ ॥

**च्युत्वा च श्रीमतीकुक्षिजन्मा श्रीधरभूपभूः । पुरेऽभूद्विजयपुरे कुमारस्तारकाभिधः ॥ ८६ ॥**

अन्वयः-च्युत्वा च विजयपुरे पुरे श्रीमती कुक्षि जन्मा श्रीधर भूप भूः तारक अभिधः कुमारः अभूत्. ॥ ८६ ॥

अर्थः-पछी त्यांथी चवीने विजयपुर नामना नगरमां श्रीमतीनामनी राणीनी कुक्षिए जन्मेलो श्रीधरनामना राजानो ते तारकनामनो कुमार थयो. ॥ ८६ ॥

**स सप्ततिधनुर्मात्रगात्रः पात्रं मषीत्विषाम् । द्विसप्तत्यब्दलक्षायुरभूदक्षामपौरुषः ॥ ८७ ॥**

अन्वयः-सः सप्तति धनुर्मात्र गात्रः, मषी त्विषां पात्रं, द्विसप्तति अब्द लक्ष आयुः, अक्षाम पौरुषः अभूत्. ॥ ८७ ॥

अर्थः—ते सीत्तेर धनुषना शरीरप्रमाणवाळो, मषीसरखी श्याम कांतिवाळो, बहोतेर लाख वर्षोना आयुवाळो, अने अतिशय बळवाळो हतो. ॥ ८७ ॥

**अन्ते पितुः प्रतापश्रीताडङ्कं चक्रमाप्य सः । प्रत्यर्धचक्री भूचक्रखण्डत्रयमसाधयत् ॥ ८८ ॥**

अन्वयः-अंते पितुः प्रताप श्री ताडंकं चक्रं आप्य सः प्रत्यर्ध चक्री भू चक्र खंड त्रयं असाधयत्. ॥ ८८ ॥

अर्थः—छेवटे ( पोताना ) पितानी प्रतापलक्ष्मीना कुंडलसरखुं चक्र मेळवीने तेणे प्रतिवासुदेव थइने पृथ्वीपरना त्रण खंडोने जीती लीधा. ॥ ८८ ॥

**इतश्चास्ति चतुर्वर्गश्रीनिरर्गलनागरा । मध्येऽब्धि स्वर्गसौभाग्यदारिका द्वारिका पुरी ॥ ८९ ॥**

अन्वयः—इतश्च मध्ये अब्धि चतुर्वर्ग श्री निरर्गल नागरा, स्वर्ग सौभाग्य दारिका द्वारिकापुरी अस्ति. ॥ ८९ ॥

अर्थः–हवे महासागरनी अंदर चारे वर्गोनी लक्ष्मीथी भरपूर नागरिकोवाळी, तथा स्वर्गनी शोभानो पण तिरस्कार करनारी द्वारिकानामनी नगरी छे. ॥ ८९ ॥

**या परैरपराभूता सुराष्ट्रमुखमण्डनम् । पश्चिमाम्भोधिनीरेभनराश्वैरेव वेष्ट्यते ॥ ९० ॥**

अन्वयः—परैः अपराभूता, सुराष्ट्र मुख मंडनं या पश्चिम अंभोधि नीर इभ नर अश्वैः एव वेष्ट्यते. ॥ ९० ॥

अर्थः—शत्रुओथी पराभव न पामेली, तथा सौरष्ट्रदेशना मुखने शोभावनारी, एवी जे नगरीने पश्चिम महासागरमां वसनाराज जलचर हाथीओ, मनुष्यो तथा घोडाओ वींटीने रहेला छे. ॥ ९० ॥

**अगोचरश्चरित्रश्रीर्ब्रह्मविद्वचसामपि । ब्रह्मचारी परस्त्रीषु ब्रह्माभूदिह भूपतिः ॥ ९१ ॥**

अन्वयः—ब्रह्म विद् वचसां अपि अगोचर चरित्र श्रीः, पर स्त्रीषु ब्रह्मचारी ब्रह्मा इह भूपतिः अभूत्. ॥ ९१ ॥

अर्थः–ब्रह्मने जाणनारा योगीओनां वचनोने पण अगोचर छे आचरणनी लक्ष्मी जेनी, तथा परस्त्रीप्रते ब्रह्मचर्यने धारण करनारो

ब्रह्मानामनो ते नगरीमां राजा हतो. ॥ ९१ ॥

तस्याभूतां शुभे कान्ते सुभद्रोमे शुभद्युती । धारे इव कृपाणस्य सतीव्रतगुणश्रिते ॥ ९२ ॥

अन्वयः—तस्य शुभे, शुभद्युती, कृपाणस्य धारे इव सतीव्रत गुण श्रिते सुभद्रा उमे कांते अभूतां. ॥ ९२ ॥

अर्थः-ते राजाने उत्तम, तथा मनोहर कांतिवाळी तलवारनी धारनीपेठे सतीव्रतरूपी गुणवाळी सुभद्रा अने उमानामनी बे स्त्रीओ हती

ताभ्यां नरेन्दुः कान्ताभ्यां शुशुभे मुमुदे च सः । रजनीश इव ज्योत्स्नारजनीभ्यां कलोज्ज्वलः ॥

अन्वयः-कला उज्ज्वलः सः नर इंदुः, ज्योत्स्ना रजनीभ्यां रजनी ईशः इव, ताभ्यां कांताभ्यां शुशुभे च मुमुदे. ॥९३॥

अर्थः-कलाओथी शोभतो एवो ते राजेंद्र, चांदनी तथा रात्रिवडे जेम चंद्र शोभे, तेम ते बन्ने स्त्रीओथी शोभतो हतो, तथा आनंद पामतो हतो,. ॥ ९३ ॥

इतश्चोत्तरतश्च्युत्वा सुभद्रागर्भमासदत् । जीवः पवनवेगस्य शृङ्गात्सिंहो गुहामिव ॥ ९४ ॥

अन्वयः—इतश्च शृगात् सिंहः गुहां इव, पवनवेगस्य जीवः उत्तरतः च्युत्वा सुभद्रा गर्भं आसादत्. ॥ ९४ ॥

अर्थः-एवामां सिंह जेम शिखरपरथी गुफामां जाय छे, तेम पवनवेगनो जीव उत्तरमांथी चवीने ते सुभद्रा राणीना गर्भमां आव्यो.

द्विपसिंहवृषादित्या इति स्वप्नचतुष्टयम् । सुभद्रासौ तदाद्राक्षीद्रामजन्माभिसूचकम् ॥ ९५ ॥

अन्वयः—तदा असौ सुभद्रा राम जन्म अभिसूचकं द्विप सिंह वृष आदित्याः इति स्वप्न चतुष्टयं अद्राक्षीत्. ॥ ९५ ॥

अर्थः—ते वखते ते सुभद्राए बलभद्रना जन्मने सूचवनारां हाथी, सिंह, वृषभ तथा सूर्यनामना चार स्वप्नो जोयां. ॥ ९५ ॥

**सूते स्म समये सूनुमियमिन्दुसमद्युतिम् । शुक्तिर्मुक्ताकणमिव क्षितिभूषणतां गतम् ॥ ९६ ॥**

अन्वयः—शुक्तिः मुक्ता कणं इव, इयं समये इंदु सम द्युतिं, क्षिति भूषणतां गतं सूनुं सूतेस्म. ॥ ९६ ॥

अर्थः—पछी छीप जेम मोतीना दाणाने जन्म आपे, तेम तेणीए योग्य समये चंद्रसरखो कांतिवाळा, तथा पृथ्वीने शोभावनारा पुत्रने जन्म आप्यो. ॥ ९६ ॥

**कारामुक्त्यादिभिर्व्यक्तं द्विषामपि ददन्मुदम् । ब्रह्मा विजय इत्यस्य सुतस्य विदधेऽभिधाम् ॥ ९७ ॥**

अन्वयः–कारा मुक्ति आदिभिः द्विषां अपि व्यक्तं मुदं ददत् ब्रह्मा अस्य सुतस्य विजय इति अभिधां विदधे. ॥ ९७ ॥

अर्थः—केदीओने छोडवाआदिकथी शत्रुओने पण प्रगटपणे हर्ष आपनारा ते ब्रह्माराजाए ते पुत्रनुं "विजय" नाम पाड्युं.

**इन्द्रियश्रीभिरात्मेव पृथक्प्रथितकर्मभिः । धात्रीभिः पञ्चभिर्लाल्यमानोऽयं ववृधे श्रिया ॥ ९८ ॥**

अन्वयः–इंद्रिय श्रीभिः आत्मा इव, पृथक् प्रथित कर्मभिः पंचभिः धात्रीभिः लाल्यमानः अयं श्रिया ववृधे. ॥ ९८ ॥

अर्थः—इंद्रियोनी शोभाथी आत्मानीपेठे, जूदां जूदां कार्यो करनारी पांच धावोवडे लाड लडावातो ते विजय शोभाथी वृद्धि पामवा लाग्यो. ॥ ९८ ॥

**वर्धमानः क्रमादेष स्मितैः कुसुमयन्दिशः । वसन्तदिवसव्यूह इव कस्य न तुष्टये ॥ ९९ ॥**

अन्वयः-क्रमात् वर्धमानः एषः स्मितैः दिशः कुसुमयन् वसंत दिवस व्यूहः इव कस्य तुष्टये न? ॥ ९९ ॥

अर्थः—अनुक्रमे वृद्धि पामतो एवो ते विजयकुमार हास्यथी दिशाओने पुष्पित करतोथको वसंतऋतुना दिवसोना समूहनीपेठे कोना आनंदमाटे न थयो? ॥ ९९ ॥

**अथोदरमुमादेव्याः प्राणतात्पर्वतश्च्युतः । अवाप पुण्यकृन्मुष्टिं चिन्तामणिरिवार्णवात् ॥ ८०० ॥**

अन्वयः-अथ अर्णवात् चिंतामणिः पुण्यकृत् मुष्टिं इव, प्राणतात् च्युतः पर्वतः उमादेव्याः उदरं अवाप. ॥ ८०० ॥

अर्थः-पछी महासागरमांथी निकळेलुं चिंतामणि रत्न जेम पुण्यशालीनी मुष्टिने प्राप्त थाय, तेम प्राणतदेवलोकमांथी चवेलो ते पर्वतनो जीव उमादेवीना उदरमां आव्यो. ॥ ८०० ॥

**करी सिंहो वृषश्चन्द्रो भानुर्वैश्वानरोऽम्बुधिः । इति स्वप्नानुमापश्यदच्युतोत्पत्तिसूचकान ॥ १ ॥**

अन्वयः-उमा करी सिंहः वृषः चंद्रः भानुः वैश्वानरः अंबुधिः इति अच्युत उत्पत्ति सूचकान् स्वप्नान् अपश्यत्. ॥ १ ॥

अर्थः-पछी ते उमाराणीए हाथी, सिंह, वृषभ, चंद्र, सूर्य, अग्नि तथा क्षीरसमुद्र नामनां वासुदेवना जन्मने सूचवनारां स्वप्नो जोयां.

**ततः सुतमसौ बालतमालदलदीधितिम् । विन्ध्यभूरिव भद्रेभं समये समजीजनत् ॥ २ ॥**

अन्वयः-ततः विंध्य भूः भद्र इभं इव, असौ समये बाल तमाल दल दीधितिं सुतं समजीजनत्. ॥ २ ॥

अर्थः-पछी विंध्याचलनी भूमि जेम भद्रजातिना हाथीनो जन्म आपे, तेम आ उमाराणीए योग्य समये उगता तमालपत्र-

सरखी (श्याम) कांतिवाळा पुत्रने जन्म आप्यो. ॥ २ ॥

**सुतोत्पत्तिं कथयता दानमानन्दितो ददत् । रचयामास न ब्रह्मा भेदमाद्यान्तयोरपि ॥ ३ ॥**

अन्वयः—आनंदितः ब्रह्मा सुत उत्पत्ति कथयतां दानं ददत् आद्य अंतयोः अपि भेदं न रचयामास. ॥ ३ ॥

अर्थः—आनंद पामेला ते ब्रह्माराजाए पुत्रनो जन्म कहेनारा मनुष्योने दान आपतांथकां पेहेला अने आ छेल्ला पुत्रवच्चे (कंइं पण) भिन्नपणुं कर्युं नही. ॥ ३ ॥

**नित्योत्सवानपि सुरानुत्सवेनापि लोभयन् । सूनोर्द्विपृष्ठ इत्याख्यां सत्यामदित भूपतिः ॥ ४ ॥**

अन्वयः—नित्य उत्सवान् अपि सुरान् उत्सवेन लोभयन् भूपतिः सूनोः द्विपृष्ठ इति सत्यां आख्यां अदित. ॥ ४ ॥

अर्थः—हमेशां उत्सववाळा एवा पण देवोने महोत्सवथी ललचावता एवा ते ब्रह्माराजाए ते पुत्रनुं "द्विपृष्ठ" एवुं सत्य नाम पाडयुं.

**अवर्धत स धात्रीभिः पुष्यमाणो यथाक्रमम् । नमस्क्रियाभिर्धर्मो वा पञ्चभिः परमेष्ठिनाम् ॥ ५ ॥**

अन्वयः—परमेष्ठिनां नमस्क्रियाभिः धर्मः वा पंचभिः धात्रीभिः पुष्यमाणः सः यथाक्रमं अवर्धत. ॥ ५ ॥

अर्थः—पंच परमेष्ठिना नमस्कारथी धर्मनीपेठे पांच धावमाताओवडे पोषातो ते द्विपृष्ठ पण अनुक्रमे वृद्धि पामवा लाग्यो. ॥ ५ ॥

**मध्ये दशानां धात्रीणां तौ क्रीडन्तौ विरेजतुः । दिशामिव निशाधीशदिनाधीशौ वरोदयौ ॥ ६ ॥**

अन्वयः—वर उदयौ निशा अधीश दिन अधीशौ दिशां इव, तौ दशानां धात्रीणां मध्ये क्रीडंतौ विरेजतुः. ॥ ६ ॥

अर्थः—उत्तम उदयवाळा चंद्र अने सूर्य जेम दशे दिशाओमां क्रीडा करता शोभे छे, तेम तेओ बन्ने दश धावमाताओनीवच्चे क्रीडा करताथका शोभता हता. ॥ ६ ॥

**नीलपीताम्बरौ तालशङ्खाङ्कौ तौ सितासितौ । धरित्रीजननेत्राणां मुदं चित्रेण चक्रतुः ॥ ७ ॥**

अन्वयः-नील पीत अंबरौ, ताल शंख अंकौ, सित असितौ तौ धरित्री जन नेत्राणां चित्रेण मुदं चक्रतुः. ॥ ७ ॥

अर्थः—श्याम तथा पीळां वस्त्रोने धारण करनारा, ताल तथा शंखना चिह्नवाळा, अने श्वेत तथा श्याम कांतिवाळा तेओ बन्ने पृथ्वीपरना लोकोनां चक्षुओने आश्चर्यथी आनंद करता हता. ॥ ७ ॥

**दोर्भूषणं शस्त्रकलाः शास्त्राणि मुखभूषणम् । जगृहाते गुरुभ्यस्तौ मञ्जूषाभ्य इव स्वयम् ॥ ८ ॥**

अन्वयः-तौ स्वयं मंजूषाभ्यः इव गुरुभ्यः दोर्भूषणं शस्त्र कलाः, मुख भूषणं शास्त्राणि जगृहाते. ॥ ८ ॥

अर्थः-पछी तेओए पोते जेम पेटीमांथी, तेम गुरुपासेथी हाथना आभूषणसरखी शस्त्रकला, अने मुखना आभूषणसरखी शास्त्रोनी विद्या ग्रहण करी. ॥ ८ ॥

**एकपात्रदशायुग्मदीप्तौ दीपाविवोज्ज्वलौ । तौ दुःखसुखयोस्तुल्यौ तुल्यस्नेहौ विलेसतुः ॥ ९ ॥**

अन्वयः-एक पात्र दशा युग्म दीप्तौ दीपौ इव उज्ज्वलौ, सुख दुःखयोः तुल्यौ, तुल्य स्नेहौ तौ विलेसतुः ॥ ९ ॥

अर्थः—एक पात्रमां रहेली बे वाटोथी प्रगट थयेला दीपकनीपेठे कांतिवाळा, सुखदुःखमां सरखा, अने तुल्य प्रीतिवाळा (पक्षे-

तुल्य तैलवाळा) एवा तेओ बन्ने विलास करता हता. ॥ ९ ॥

**तौ शस्त्रतोऽधिकं शश्वत्क्रीडयैवार्धचक्रिणः । अशस्त्रमाज्ञाभङ्गाख्यं वधं वध्यस्य चक्रतुः ॥ १० ॥**

अन्वयः—तौ शश्वत् क्रीडया एव वध्यस्य अर्ध चक्रिणः, शस्त्रतः अधिकं आज्ञा भंग आख्यं वधं चक्रतुः. ॥ १० ॥

अर्थः—तेओ बन्ने हमेशां क्रीडामात्रमांज वधकरवालायक प्रतिवासुदेवना, शस्त्रथी पण अधिक, आज्ञाभंगनामनो वध करवा लाग्या.

**परिज्ञाय तयोर्दूरादाज्ञातिक्रमविक्रमं । स्पृशो गत्वा त्वरातारास्तारकं प्रत्यदोऽवदन् ॥ ११ ॥**

अन्वयः—स्पृशः दूरात् तयोः आज्ञा अतिक्रम विक्रमं परिज्ञाय, त्वरातारः तारकंप्रति गत्वा अदः अवदन्. ॥ ११ ॥

अर्थः—(त्यारे) गुप्त चरोए दूरथीज तेओ बन्नेना आज्ञाना उल्लंघनरूप पराक्रमने जाणीने, एकदम जइने ते तारकनामना प्रतिवासुदेवने ते हकीकत जणावी के, ॥ ११ ॥

**देव त्वत्सेवकस्यापि दारकौ द्वारिकापतेः । आज्ञां तव न मन्येते धुर्यौ रश्मिमिवोद्धतौ ॥ १२ ॥**

अन्वयः—(हे) देव! त्वत् सेवकस्य अपि द्वारिकापतेः दारकौ, उद्धतौ धुर्यौ रश्मिं इव तव आज्ञां न मन्येते. ॥ १२ ॥

अर्थः—हे स्वामी? आपना सेवक एवा पण द्वारिकाधीशना बन्ने पुत्रो, उद्धत बळदो जेम रासने गणकारता नथी, तेम आपनी आज्ञा मानता नथी. ॥ १२ ॥

**गतः स कालस्तेजोऽस्तु तारकस्य क्व संप्रति । शूरौ यदुदितावेतावित्याहुः सेवकास्तयोः ॥ १३ ॥**

अन्वयः—सः कालः गतः, संप्रति तारकस्य तेजः क्व अस्तु ? यत् एतौ शूरौ उदितौ, इति तयोः सेवकाः आहुः. ॥ १३ ॥

अर्थः—ते समय हवे चाल्यो गयो छे, हवे ते तारकनुं तेज क्यां रह्युं छे ? केमके आ बन्ने सूर्यो ( शूरवीरो ) उदय पाम्या छे, एम तेओ बन्नेना सेवको कहेवा लाग्या छे. ॥ १३ ॥

**अखर्वदोर्बलौ सर्वशस्त्रज्ञौ गर्वपर्वतौ । त्वां प्रति प्रतिभातस्तौ न शुभौ शोभनं कुरु ॥ १४ ॥**

अन्वयः—अखर्व दोर्बलौ, सर्व शस्त्रज्ञौ, गर्व पर्वतौ तौ त्वां प्रति प्रतिभातः, शुभौ न, शोभनं कुरु ? ॥ १४ ॥

अर्थः—न अटकावी शकाय एवा भुजबलवाळा, सर्व शस्त्रकला जाणनारा, तथा गर्वथी पर्वतसरखा, एवा तेओ बन्ने तमारा सामोवडीया थइने जे उभा छे, ते ठीक नथी, माटे योग्य (उपाय) करो ? ॥ १४ ॥

**इति श्रुत्वोद्धतक्रोधो यमयोधोध्धुरस्वरः । ऊचेऽर्धचक्री सेनान्यं सेनान्यश्चितसागरः ॥ १५ ॥**

अन्वयः—इति श्रुत्वा उद्धत क्रोधः, यम योध उध्धुर स्वरः, सेना न्यंचित सागरः अर्धचक्री सेनान्यं ऊचे. ॥ १५ ॥

अर्थः—एम सांभळीने, क्रोधातुर थयेलो, यमना योधासरखा उद्धत नादवाळो, तथा सैन्यथी महासागरने पण भरी देनारो ते प्रतिवासुदेव (पोताना) सेनापतिने कहेवा लाग्यो के, ॥ १५ ॥

**सपुत्रद्वारिकाधीशवधप्रधनसंधया । प्रपञ्चय चमूवीचोर्नीचीकृतकुलाचलाः ॥ १६ ॥**

अन्वय,—सपुत्र द्वारिका अधीश वध प्रधन संधया, नीचीकृत कुल अचलाः चमूवीचीः प्रपंचय ? ॥ १६ ॥

अर्थः–पुत्रोसहित द्वारिकाना राजानो वध करवाना संग्रामनी प्रतिज्ञाथी कूलपर्वतोने पण नीचां करे, एवी सेनानी तैयारी करो?

**न चाटुवचनैर्नाग्रेलुण्ठनैर्नांघ्रिसेवनैः । न चाननतृणादानैस्ते मोक्तव्याः कथंचन ॥ १७ ॥**

अन्वयः–चाटु वचनैः न, अग्रे लुंठनैः न, अंघ्रि सेवनैः न, च आनन तृण आदानैः ते कथंचन न मोक्तव्याः. ॥ १७ ॥

अर्थः—नही मीठां वचनोथी, नही आगळ लोटवाथी, नही पगे पडवाथी, के नही मुखमां तृण लेवाथी, तेओने कोइपण रीते छोडवा नही. ॥ १७ ॥

**अधुनैवाधिकोत्साहैर्वाहैः सज्जय मे रथम् । मास्तु कालविलम्बस्ते भम्भां संभावय द्रुतम् ॥ १८ ॥**

अन्वयः–अधुना एव अधिक उत्साहैः वाहैः मे रथं सज्जय? काल विलंबः मा अस्तु? ते भंभां द्रुतं संभावय? ॥ १८ ॥

अर्थः—हमणाज अधिक उत्साहवाळा घोडाओवडे मारो रथ तैयार कर? तेमां जरा पण वखतनो विलंब थवो न जोइये, अने तारां रणशींगांनी तुरत संभाळ ले? ॥ १८ ॥

**अथामात्यपतिर्भूपमजल्पन्नयकल्पवित् । देव सेवक एवाद्य यावदस्ति स ते नृपः ॥ १९ ॥**

अन्वयः–अथ नय कल्पवित् अमात्यपतिः भूपं अजल्पत्, (हे) देव! सः नृपः अद्य यावत् ते सेवकः अस्ति. ॥ १९ ॥

अर्थः–त्यारे नीतिआचारने जाणनारा मंत्रीश्वरे राजाने कह्युं के, हे स्वामी! ते राजा आजदनसुधी आपनो सेवक छे. ॥ १९ ॥

निदेशवर्तिनं चैनं मानयोग्यं निगृह्णतः । परिवारेऽपि पुंनाग विरागस्ते भविष्यति ॥ २० ॥

अन्वयः-हे पुंनाग! निदेश वर्तिनं, च मानयोग्यं एनं निगृह्णातः ते परिवारे अपि विरागः भविष्यति. ॥ २० ॥

अर्थः-हे पुरुषोत्तम! आज्ञामां रहेला, अने सन्मानयोग्य एवा ते राजाने मारवाथी आपना परिवारमां पण विखवाद थशे.

तदुत्पादयितुं दोषं दूतस्तं प्रति युज्यताम् । मृत्युरप्यङ्गिनं हन्ति नान्नदोषादिना विना ॥ २१ ॥

अन्वयः—तत् दोषं उत्पादयितुं तंप्रति दूतः युज्यतां ? मृत्युः अपि अन्न दोष आदिना विना अंगिनं न हंति. ॥ २१ ॥

अर्थः-माटे तेनापर आरोप मूकवामाटे तेनीपासे दूतने मोकलवो जोइये, केमके मृत्यु पण अनाजना दोषआदिकविना प्राणीने-मारतो नथी. ॥ २१ ॥

दूतेनाश्वेभरत्नानि याच्योऽसौ चेन्न दास्यति । तद्दोषी दोषवान्सर्वो विभौ हि च्छलवीक्षके ॥ २२ ॥

अन्वयः-दूतेन अश्व इभ रत्नानि असौ याच्यः, चेत् न दास्यति, तत् दोषी, हि छल वीक्षके विभौ सर्वः दोषवान्. ॥ २२ ॥

अर्थः—दूतमारफते घोडा, हाथी तथा रत्नोनी तेनी पासे मागणी करवी, जो न आपे, तो तेने गुन्हेगार जाणवो, केमके छल जोनारा स्वामीपासे सर्व कोइ गुन्हेगार छे. ॥ २२ ॥

राज्ञाथ तद्गिरि प्रीतिं वहता प्रहितश्चरः । पार्श्वस्थितसुतद्वन्द्वं ब्रह्माणं स्माह संसदि ॥ २३ ॥

अन्वयः—अथ तद्गिरि प्रीतिं वहता राज्ञा प्रहितः चरः, संसदि पार्श्व स्थित सुत द्वंद्वं ब्रह्माणं स्माह. ॥ २३ ॥

अर्थः—पछी ते मंत्रीना वचनमां प्रीति धारण करनारा ते राजाए मोकलेलो दूत सभामां जइने, पासे बेठेला बन्ने पुत्रोवाळा ते ब्रह्माराजाने कहेवा लाग्यो के, ॥ २३ ॥

**भूप त्वां तारको वक्ति भक्तिमान्सेवकोऽसि मे । तत्पाल्योऽसि ममैव त्वं किं ते हस्तिहयादिना ॥२४॥**

अन्वयः-(हे) भूप! त्वां तारकः वक्ति, त्वं मे भक्तिमान् सेवकः असि, तत् मम एव पाल्यः असि, ते हस्ति हय आदिना किं?

अर्थः—हे राजन्! तने तारक राजा एम कहे छे के, तुं मारो भक्तिवंत सेवक छो, अने तेथी मारेज तारुं रक्षण करवानुं छे, माटे तारे हाथी घोडाआदिकनी शी जरुर छे? ॥ २४ ॥

**यच्छ तत्सर्वमस्मभ्यं यन्न लभ्यं तवास्ति यत् । यद्वस्तु भरतार्धे स्याद् भरतार्धपतेर्हि तत् ॥ २५ ॥**

अन्वयः—तत् सर्वं अस्मभ्यं यच्छ? यत् तव लभ्यं न अस्ति, हि भरत अर्धे यत् वस्तु स्यात्, तत् भरत अर्धपतेः. ॥ २५ ॥

अर्थः—माटे ते सघळुं अमोने आपी दीओ? तमारे कंइं पण राखवानुं नथी, कारणके आ भरतार्धमां जे कंइं वस्तु छे, ते सघळी भरतार्धना स्वामीनी छे. ॥ २५ ॥

**जल्पन्तमित्यमुं कोपस्वल्पकल्पान्तपावकः । दूतं भ्रूतन्तुतेजोभिर्बध्नन्निव जगौ हरिः ॥ २६ ॥**

अन्वयः—इति जल्पंतं अमुं, दूतं कोप स्वल्प कल्पांत पावकः हरिः भ्रू तंतु तेजोभिः बध्नन् इव जगौ. ॥ २६ ॥

अर्थः-एरीते बोलता एवा ते दूतने, क्रोधथी कल्पांत कालना अग्निने पण स्वल्प करनारा वासुदेव, भ्रुकुटिना तंतुओना तेजथी

जाणे बांधता होय नही! तेम बोलवा लाग्या के, ॥ २६ ॥

**कुलक्रमागते राज्ये वयं स्मः स च विद्यते । स चेन्न सेवकोऽस्माकं तत्किं तत्सेवका वयम् ॥ २७ ॥**

अन्वयः-कुल क्रम आगते राज्ये वयं स्मः, च सः विद्यते, सः चेत् अस्माकं सेवकः न, तत् वयं तत् सेवकाः किं? ॥ २७ ॥

अर्थः—कुलपरंपराथी आवेलुं राज्य अमो भोगवीये छीये, अने ते पण भोगवे छे, अने जो ते अमारो सेवक नथी, तो अमो तेना शाना सेवको होइ शकीये? ॥ २७ ॥

**सोऽस्माकं पालको भूत्वा मूढो रत्नानि याचते । यदा प्रत्युत याचिष्ये कस्तं पालयिता तदा ॥ २८ ॥**

अन्वयः-सः मूढः अस्माकं पालकः भूत्वा यदा रत्नानि याचते, प्रत्युत याचिष्ये, तदा तं कः पालयिता? ॥ २८ ॥

अर्थः—ते मूर्खो अमारो रक्षक थईने ज्यारे रत्नोनी मागणी करे छे, परंतु कदाच हुं तेनीपासेथी तेवी मागणी करीश, त्यारे तेनुं रक्षण कोण करशे? ॥ २८ ॥

**मय स्थिते हरौ क्रोष्टा भरतार्धपतिः क्व सः । गच्छ तच्छिरसा सार्धं रत्नान्यादातुमेम्यहम् ॥ २९ ॥**

अन्वयः-मयि हरौ स्थिते सः क्रोष्टा भरत अर्ध पतिः क्व? गच्छ? अहं तत् शिरसा सार्धं रत्नानि आदातुं एमि, ॥ २९ ॥

अर्थः—हुं सिंह ( पक्षे-विष्णु ) बेठां ते शीयालसरखो भरतार्धनो स्वामी ( पक्षे-प्रतिविष्णु ) शुं वीसातमां छे. माटे तुं चाल्यो जा? अने हुं तेनां मस्तकसहित रत्नो लेवाने आवुं छुं. ॥ २९ ॥

**इत्युक्त्वा विष्णुनोत्खात इव भ्रूशिखयासनात्। स गत्वाशु चरः सर्वं स्वभर्त्रे तथ्यमभ्यधात् ॥ ३० ॥**

अन्वयः–इति उक्त्वा विष्णुना भ्रू शिखया आसनात् उत्खातः इव, सः चरः आशु गत्वा, स्वभर्त्रे सर्वं तथ्यं अभ्यधात्. ३०

अर्थः—एम कहीने विष्णुए भ्रुकुटिनी शिखाथी जाणे आसनपरथी उखेडी नाख्यो होय नही! तेम ते दूते तुरत जइने पोताना स्वामिने सघळी सत्य हकीकत कही संभळावी. ॥ ३० ॥

**क्रोधक्रौर्यत्रसत्कालस्तत्कालमथ तारकः। रिपुप्राणप्रयाणाय प्रयाणकमकारयत् ॥ ३१ ॥**

अन्वयः—अथ क्रोध क्रौर्य त्रसत् कालः तारकः रिपु प्राण प्रयाणाय प्रयाणकं अकारयत्. ॥ ३१ ॥

अर्थः–पछी क्रोध तथा क्रूरताथी यमने पण डरावनारा ते तारक प्रतिवासुदेवे शत्रुना प्राणोनो नाश करवामाटे (त्यांथी) प्रयाण कराव्युं. ॥ ३१ ॥

**जिताम्भोधरसंभारभम्भारवनवश्रवात्। मनोमयूराः शूराणामखण्डं ताण्डवं व्यधुः ॥ ३२ ॥**

अन्वयः–जित अंभोधर संभार भंभा रव नव श्रवात् शूराणां मनः मयूराः अखंडं तांडवं व्यधुः. ॥ ३२ ॥

अर्थः–जितेल छे मेघनी गर्जना जेणे एवा भेरीना नवा नादना श्रवणथी शूरवीरोनां हृदयरूपी मयूरो अखंडपणे नृत्य करवा लाग्या.

**अभूच्चतुर्भिः पूर्द्वारैश्चतुरङ्गचमूद्गमः। चतुर्विधायुधोद्दामश्चतुर्भुजजयेच्छया ॥ ३३ ॥**

अन्वयः—चतुर्भुज जय इच्छया चतुर्भिः पूर्द्वारैः चतुर्विध आयुध उद्दामः चतुरंग चमू उद्गमः अभूत्. ॥ ३३ ॥

अर्थः—पछी चार भुजाओवाळा ते विष्णुने जीतवानी इच्छाथी नगरना चार दरवाजाओमांथी चार प्रकारना शस्त्रोवडे प्रचंड बनेलां चतुरंगी सैन्यनी उत्पत्ति थइ. ॥ ३३ ॥

**मिलद्भिर्मन्त्रिधात्रीशदेशाधीशादिसैनिकैः । तच्चमूर्ववृधे यान्ती नदी नद्यन्तरैरिव ॥ ३४ ॥**

अन्वयः—मिलद्भिः मंत्रि धात्री ईश देश अधीश आदि सैनिकैः, नद्यंतरैः नदी इव, यांती तत् चमूः ववृधे. ॥ ३४ ॥

अर्थः—तेमां आवी मलता मंत्रीओ, राजाओ, अने मंडलीको आदिकोना सुभटोवडे, बीजी नदीओथी जेम (मुख्य) नदी, तेम चालती एवी तेनी सेना वृद्धि पामवा लागी. ॥ ३४ ॥

**प्रयाणैरप्रमाणैश्च सावेशः प्रतिकेशवः । द्रागलङ्घिष्ट मार्गार्धमलङ्घितपराक्रमः ॥ ३५ ॥**

अन्वयः—च स आवेशः, अलंघित पराक्रमः प्रतिकेशवः अप्रमाणैः प्रयाणैः द्राक् मार्ग अर्ध अलंघिष्ट. ॥ ३५ ॥

अर्थः—पछी आवेशमां आवेलो, अने नथी उल्लंघायेलुं पराक्रम जेनुं एवा ते प्रतिवासुदेवे प्रमाणरहित प्रयाणोवडे तुरत अर्ध मार्गनुं उल्लंघन कर्युं. ॥ ३५ ॥

**इतश्च तादृगुत्साहसाहसाभोगभूषितः । हरिरप्येत्य मार्गार्धं रुद्धवान्मार्गमग्रतः ॥ ३६ ॥**

अन्वयः—इतश्च तादृक् उत्साह साहस आभोग भूषितः, हरिः अपि मार्ग अर्धं एत्य अग्रतः मार्गं रुद्धवान्. ॥ ३६ ॥

अर्थः—एवामां तेवाज उत्साह अने साहसथी अलंकृत थयेला विष्णुए पण अर्धे मार्गे आवीने अगाडीना मार्गने रोकी दीधो.

ततः प्रततसंग्रामगुणग्रामग्रहोन्मुखाः । यमश्रुतिसुखां वार्तां प्रतेनुरुभये भटाः ॥ ३७ ॥

अन्वयः-ततः प्रतत संग्राम गुण ग्राम ग्रह उन्मुखाः उभये भटाः यम श्रुति सुखां वार्तां प्रतेनुः. ॥ ३७ ॥

अर्थः—पछी विस्तीर्ण संग्रामना गुणग्राम करवाने तत्पर थयेला बन्ने सैन्योना सुभटो यमना कर्णोने जेथी सुख उपजे एवी वार्ता करवा लाग्या. ॥ ३७ ॥

एकैकजन्तुग्रासेनातृप्तमालस्यशायिनम् । यमं जागरयामासुर्युद्धतूर्यस्वना घनाः ॥ ३८ ॥

अन्वयः-घनाः युद्ध तूर्य स्वनाः एक एक जंतु ग्रासेन अतृप्तं, आलस्य शायिनं यमं जागरयामासुः. ॥ ३८ ॥

अर्थः—युद्धना वाजित्रोना गंभीर नादो, एकेका प्राणीना भोजनथी तृप्त नही थयेला, अने आळसमां सूतेला यमराजने जगाडवा लाग्या. ॥ ३८ ॥

देहैः प्रहतिसस्नेहै रोमाञ्चोच्छ्वासवारितान् । सन्नाहाञ्जगृहुः कष्टं भटाः स्वामिजयेच्छया ॥ ३९ ॥

अन्वयः-भटाः स्वामि जय इच्छया, रोमांच उच्छ्वास वारितान् सन्नाहान्, प्रहति स स्नेहैः देहैः कष्टं जगृहुः ॥ ३९ ॥

अर्थः—पछी सुभटोए (पोतपोताना) स्वामिना विजयनी इच्छार्थी, रोमांचोना उद्गमथी अटकायेलां बखतरोने, संग्राममां प्रितिवाळां (पोतानां) शरीरोपर मुश्केलीथी चडाववा लाग्या. ॥ ३९ ॥

इष्टोऽत्र मृत्युरागच्छन्परिरब्धुं चिरेप्सितः । पराङ्मुखा भून्मे मेति नागृह्णन्केऽपि कञ्चुकान् ॥ ४० ॥

अन्वयः—अत्र इष्टः, चिर इप्सितः, परिरब्धुं आगच्छन् मृत्युः मा मा परांमुखः भूत्, इति के अपि कंचुकान् न अगृह्णन्.

अर्थः—अहीं व्हालुं तथा घणा काळथी इच्छेलुं, भेटवाने आवतुं मरण पाछुं न वळी जाय तो ठीक, एम विचारीने केटलाक सुभटोए तो बख्तरो पण पेहेर्यां नही. ॥ ४० ॥

**ततः पारापतद्यूतकारा इव घनत्वराः । उभयेऽप्यमिलन्वीरा वपुर्नीरागचेतसः ॥ ४१ ॥**

अन्वयः—ततः पारापत द्यूतकाराः इव घन त्वराः उभये अपि वीराः, वपुः नीराग चेतसः अमिलन्. ॥ ४१ ॥

अर्थः—पछी पारेवां अने जुगारीओनीपेठे अति उतावळथी बन्ने सैन्योना सुभटो हृदयथी पण शरीरनी दरकार राख्याविना (सामसामा) आवी मळ्या. ॥ ४१ ॥

**असयोऽन्तर्वसद्भर्तृप्रतापज्वलिता इव । परस्पराभिपातेन स्फुलिङ्गान्मुमुचुर्मुहुः ॥ ४२ ॥**

अन्वयः—अंतः वसत् भर्तृ प्रताप ज्वलिताः इव, असयः परस्पर अभिपातेन मुहुः स्फुलिंगान् मुमुचुः. ॥ ४२ ॥

अर्थः—हृदयमां वसता स्वामिना प्रतापथी जाणे सळगी उठी होय नही! तेम तलवारो परस्पर अथडावाथी वारंबार तणखाओने झरवा लागी. ॥ ४२ ॥

**द्विषत्तेजोऽग्निमेघेषु गजेषु मदवर्षिषु । खद्योतकल्पैरद्योति स्फुलिङ्गैर्दन्तघातजैः ॥ ४३ ॥**

अन्वयः—द्विषत् तेजः अग्नि मेघेषु गजेषु मद वर्षिषु खद्योत कल्पैः दंत घात जैः स्फुलिंगैः अद्योति. ॥ ४३ ॥

अर्थः–शत्रुओना तेजरूपी अग्निथी उत्पन्न थयेलां वादळांओसरखा हाथीओ मदनो वरसाद वरसावते छते, पतंगीयांओसरखा, दांतोना घातोथी उत्पन्न थयेला तणखाओ दीपवा लाग्या. ॥ ४३ ॥

**सायकाः शाकिनीमन्त्रा इव स्यन्दनशालिनाम् । अदृष्टा एव वध्याङ्गप्रविष्टा रुधिरं पपुः ॥ ४४ ॥**

अन्वयः–स्यंदन शालिनां सायकाः शाकिनी मंत्राः इव, अदृष्टाः एव वध्य अंग प्रविष्टाः रुधिरं पपुः. ॥ ४४ ॥

अर्थः–रथोवडे मनोहर ( रथोमां बेठेला ) सुभटोनां बाणो शाकिनीओना मंत्रोनीपेठे अदृश्यपणेज शत्रुओना शरीरोमां दाखल थइने रुधिर पीवा लाग्या. ॥ ४४ ॥

**वाहवद्भिर्मणिश्रेणिसन्नाहद्युतिवेणिभीः । नाबोधि रुधिरं निर्यत्तादृक्शल्यप्रहारजम् ॥ ४५ ॥**

अन्वयः–मणि श्रेणि सन्नाह द्युति वेणिभिः वाहवद्भिः, तादृक् शल्य प्रहार जं निर्यत् रुधिरं न अबोधि. ॥ ४५ ॥

अर्थः–मणिओनी श्रेणिओवाळां बख्तरोनी कांतिओनी हारवाळा घोडेस्वारोए तेवा प्रकारना भालांओना प्रहारथी उत्पन्न थयेलां, अने (शरीरमांथी बहार) निकळतां रुधिरने जाणी पण शक्या नही. ॥ ४५ ॥

**सन्नाहशस्त्रदण्डास्थिखण्डानां त्रुटतां स्वनैः । घ्नतां घोषैश्च घोरोऽभून्मृत्योरपि भिये क्षणः ॥ ४६ ॥**

अन्वयः–त्रुटतां सन्नाह शस्त्र दंड अस्थि खंडानां स्वनैः, च घ्नतां घोषैः घोरः क्षणः मृत्योः अपि भिये अभूत्. ॥ ४६ ॥

अर्थः—त्रटी पडतां बख्तरो, शस्त्रो, दंडो तथा हाडकांओना टुकडाओना शब्दोथी, तथा घायल थता सुभटोना आर्तनादोथी प्रचंड

बनेलो ते रणसंग्राम यमराजने पण भयानक थइ पड्यो. ॥ ४६ ॥

**प्रकम्पितासयो हस्ता मौलयः सिंहनादिनः । अमर्षिणां द्विषत्खड्गोत्क्षिप्ताः खेऽत्रासयन्सुरान् ॥ ४७ ॥**

अन्वयः–द्विषत् खड्ग उत्क्षिप्ताः अमर्षिणां प्रकंपित असयः हस्ताः, सिंह नादिनः मौलयः खे सुरान् अत्रासयन्. ॥ ४७ ॥

अर्थः–शत्रुओना खड्गोवडे उंचे उडेला शूरवीरोना, कंपती तलवारोवाळा हाथ, तथा सिंहनाद करनारां मस्तको आकाशमां रहेला देवोने पण त्रास पमाडवा लाग्या. ॥ ४७ ॥

**युध्यमानमहावीरः क्षीणवीरगणः क्षणम् । व्यक्तोऽजनि रणः कामं कालकान्तादृगुत्सवः ॥ ४८ ॥**

अन्वयः–युध्यमान महावीरः, क्षीण वीर गणः, काल कांता दृग् उत्सवः, क्षणं कामं व्यक्तः रणः अजनि. ॥ ४८ ॥

अर्थः–युद्ध करता छे महान् सुभटो जेमां, नाश पाम्या छे वीरोना समूहो जेमां, तथा यमनी स्त्रीनी (चंडिकानी) आंखोने आनंद आपनारो, क्षणवारसुधी सारीरीते (जोरथी) प्रगटपणे संग्राम थयो. ॥ ४८ ॥

**क्षीणास्त्रो बाहुमेव स्वमस्त्रीकृत्य द्विषत्कृतम् । चक्रे कश्चन पीठाब्जमागताया जयश्रियः ॥ ४९ ॥**

अन्वयः–क्षीण अस्त्रः कश्चन स्वं बाहुं एव अस्त्रीकृत्य आगतायाः जयश्रियः द्विषत् कृतं पीठ अब्जं चक्रे. ॥ ४९ ॥

अर्थः–खूटी गयेलां शस्त्रोवाळा कोइक सुभटे पोताना हाथनेज शस्त्ररूप करीने, आवेली जयलक्ष्मीने (बेसवामाटे) शत्रुए आपेली पीठनेज कमलरूप करी. ॥ ४९ ॥

छिन्नायुधभुजामौलिः कश्चिदुत्पत्य कोपतः । ऊरुसंदंशबन्धेन द्विषमाशु व्यसुं व्यधात् ॥ ५० ॥

अन्वयः–छिन्न आयुध भुजा मौलिः कश्चित् कोपतः उत्पत्य ऊरु संदंश बंधेन द्विषं आशु व्यसुं व्यधात्. ॥ ५० ॥

अर्थः–शस्त्रथी छेदाइ गया छे हाथ तथा मस्तक जेना एवा कोइक सुभटे क्रोधथी उछळीने, शत्रुने ( पोताना ) बे साथळोरूपी साणसामां दाबीने तुरत प्राणरहित कर्यो. ॥ ५० ॥

कोऽप्यभ्युत्थापयन्नङ्गान्याजिकण्डूभरच्छिदे । प्रहारान्दृढयामास रिपोर्मन्दप्रहारिणः ॥ ५१ ॥

अन्वयः–कः अपि आजि कंडू भर च्छिदे अंगानि अभ्युत्थापयन् मंद प्रहारिणः रिपोः प्रहारान् दृढयामास. ॥ ५१ ॥

अर्थः—कोइक सुभटे तो संग्रामनी खरजनो समूह मटाडवामाटे, (पोतानां) अंगो आगळ धरीने, धीमेथी प्रहार करता शत्रुना प्रहारोने मजबूत बनाव्या. ॥ ५१ ॥

दृक्पातेनैव निर्भग्ने परवीरगणेऽपरः । अपूर्णयुद्धाभिप्रायोऽभजत्प्रायोपवेशनम् ॥ ५२ ॥

अन्वयः–दृक् पातेन एव पर वीर गणे निर्भग्ने अपरः, अपूर्णयुद्ध अभिप्रायः प्राय उपवेशनं अभजत्. ॥ ५२ ॥

अर्थः—फक्त (पोताना) दृष्टिपातथीज शत्रुना सुभटोनो समूह नाशी जवाथी कोइक सुभटने तो संग्रामनी इच्छा पूर्ण न थवाथी बेसीज रहेवुं पडयुं. ॥ ५२ ॥

**तुल्यं हक्कां प्रहारं च। दत्वा हक्काच्युतायुधे। द्विषि द्विखण्डिते कोऽपि स्वं जघानानुतापतः ॥ ५३ ॥**

अन्वयः—कः अपि हक्कां च प्रहारं तुल्यं दत्वा, हक्का च्युत आयुधे द्विषि द्वि खंडिते अनुतापतः स्वं जघान. ॥ ५३ ॥

अर्थः—कोइक सुभटे तो एकसरखी हांकल तथा प्रहार देइने, हांकलथी खरी पडेलां हथीयारवाळो शत्रु होते छते, पश्चात्तापथी पोते आपघात कर्यो. ॥ ५३ ॥

**स्वाङ्गे प्रहारमिच्छन्तौ दृढं कौचिन्महाभटौ। क्रुधान्यतोऽन्यतो यातौ दयामन्दप्रहारिणौ ॥ ५४ ॥**

अन्वयः—स्व अंगे दृढं प्रहारं इच्छंतौ कौचित् महाभटौ दया मंद प्रहारिणौ क्रुधा अन्यतः अन्यतः यातौ. ॥ ५४ ॥

अर्थः—पोत पोताना शरीरपर गाढ प्रहारने इच्छता एवा कोइक बे महासुभटो, दयाथी मंद प्रहार करताथका क्रोधथी बीजी बीजी जगोए चाल्या गया. ॥ ५४ ॥

**प्रतिघातमकुर्वन्तो दत्तघातेषु शत्रुषु। पश्यन्तः सदृशं वीरं चिरं केऽप्यभ्रमन्भटाः ॥ ५५ ॥**

अन्वयः—दत्त घातेषु शत्रुषु प्रतिघातं अकुर्वंतः, सदृशं वीरं पश्यंतः के अपि भटाः चिरं अभ्रमन्. ॥ ५५ ॥

अर्थः—घा करनारा शत्रुओपर सामो घा नही करता, अने पोतासरखा शूरवीरने शोधताथका केटलाक सुभटो घणा काळसुधी भमवा लाग्या. ॥ ५५ ॥

द्विषि प्रहारिण्यभ्यासादङ्गनाशं चकार यः । वीरास्तमप्यमन्यन्त कातरं जातरहंसः ॥ ५६ ॥

अन्वयः-प्रहारिणि द्विषि यः अभ्यासात् अंग नाशं चकार, तं अपि जात रंहसः वीराः कातरं अमन्यंत ॥ ५६ ॥

अर्थः-शत्रु प्रहार करते छते जेणे अभ्यासथी (पोतानांज) शरीरनो नाश कर्यो छे, तेने पण शूरवीर सुभटो कायर मानवा लाग्या.

अबिभ्यत्सुभटेभ्यस्तच्छस्त्रं शस्त्रेण योऽच्छिनत् । मृत्युभीतो न वीरेषु सोऽपि रेखामवाप्तवान् ॥ ५७ ॥

अन्वयः-सुभटेभ्यः अबिभ्यत् यः तत् शस्त्रं शस्त्रेण अच्छिनत्, सः अपि मृत्यु भीतः वीरेषु रेखां न अवाप्तवान ॥ ५७ ॥

अर्थः-सुभटोथी नही डरनारा एवा जे सुभटे तेनां शस्त्रने शस्त्रथी छेदी नाख्युं, ते पण मृत्युथी बीकण मनातो थको शूरवीरोनी गणनामां आवी शक्यो नही. ॥ ५७ ॥

एवं तरन्तो युद्धाब्धिं दोर्भ्यामेवोभये भटाः । सकौतुकमलोक्यन्त दृक्पातेन जयश्रिया ॥ ५८ ॥

अन्वयः-एवं दोर्भ्यां एव युद्ध अब्धिं तरंतः उभये भटाः, जय श्रिया दृक् पातेन अलोक्यंत. ॥ ५८ ॥

अर्थः-ए रीते बन्ने हाथथीज संग्रामरूपी महासागरने तरनारा ते बन्ने सैन्योना सुभटोने जय लक्ष्मीए (फक्त) दृष्टिपातथी जोया.

आरुह्याथ रथं तल्पमिवाभीष्टं जयश्रियः । तत्कण्ठमिव वैकुण्ठः पाञ्चजन्यं मुदाग्रहीत् ॥ ५९ ॥

अन्वयः-अथ जय श्रीयः अभीष्टं तल्पं इव रथं आरुह्य वैकुंठः तत्कंठं इव पांचजन्यं मुदा अग्रहीत् ॥ ५९ ॥

अर्थः—पछी जयलक्ष्मीनी व्हाली शय्या सरखा रथपर चडीने विष्णुए तेणीना कंठसरखा पांचजन्य शंखने हर्षथी ग्रहण कर्यो.

**अस्त्राधिदैवतान्यस्त्रशय्यासुप्तानि सत्वरम् । शौरिर्जागरयामास पाञ्चजन्यं प्रणादयन् ॥ ६० ॥**

अन्वयः—शौरिः पांचजन्यं प्रणादयन् अस्त्र शय्या सुप्तानि अस्त्र अधिदैवतानि सत्वरं जागरयामास. ॥ ६० ॥

अर्थः—पछी ते विष्णुए ते पांचजन्य शंखने वगाडतां थकां शस्त्रोरूपी शय्यामां सुतेला शस्त्रोना अधिष्टायक देवोने एकदम जगाड्या.

**तेन शङ्खस्य घोषेण सैन्यानि प्रतिशार्ङ्गिणः । तृणानि पवनेनेवोड्डाययामासिरेऽग्रतः ॥ ६१ ॥**

अन्वयः—शंखस्य तेन घोषेण प्रतिशार्ङ्गिणः सैन्यानि पवनेन तृणानि इव अग्रतः उड्डाययामासिरे ॥ ६१ ॥

अर्थः—शंखना ते नादथी प्रतिवासुदेवनां सैन्यो, पवनथी घासनी पेठे अगाडीना भागमां उडवा लाग्यां. ॥ ६१ ॥

**संक्रुद्धस्तद्ध्वनेरब्दशब्दादिव मृगाधिपः । शैलशृङ्गमिवारोहद्रथं प्रतिरथाङ्गभृत् ॥ ६२ ॥**

अन्वयः—अब्द शब्दात् मृग अधिपः शैल शृंगं इव, तत् ध्वनेः संक्रुद्धः प्रतिरथांगभृत् रथं आरोहत्. ॥ ६२ ॥

अर्थः—पछी मेघनी गर्जनाथी (क्रोध पामेलो) सिंह जेम पर्वतना शिखरपर चडे, तेम ते शंखना नादथी क्रोध पामेलो ते तारक प्रतिविष्णु पण रथपर चड्यो. ॥ ६२ ॥

**जयलक्ष्मीहठाकृष्टिसिद्धमन्त्राक्षरैरिव । सैन्यानि चापटङ्कारैः स्थिरयन्स हरिं ययौ ॥ ६३ ॥**

अन्वयः—जय लक्ष्मी हठ आकृष्टि सिद्ध मंत्र अक्षरैः इव, चाप टंकारैः सैन्यानि स्थिरयन् सः हरिं ययौ. ॥ ६३ ॥

अर्थ.–पछी जयलक्ष्मीने बळात्कारे खेंची लावनारा सिद्ध मंत्राक्षरोसरखा धनुषना टंकारनादोथी (पोतानां) सैन्योने स्थिर करतो थको ते प्रतिवासुदेव वासुदेवनी सामे गयो. ॥ ६३ ॥

**क्रुद्धौ दृग्युद्धवाग्युद्धपूर्वं सर्वायुधैः क्रमात् । परस्परेण संरब्धौ प्रारब्धौ योद्धुमेव तौ ॥ ६४ ॥**

अन्वयः—क्रुद्धौ संरब्धौ तौ दृग्युद्ध वाग्युद्ध पूर्वं, क्रमात् सर्व आयुधैः परस्परेण योध्धुं एव प्रारब्धौ. ॥ ६४ ॥

अर्थः—पछी क्रोध पामीने तैयार थयेला एवा तेओ बन्ने दृष्टियुद्ध, तथा वचनयुद्धपूर्वक अनुक्रमे सर्व शस्त्रोथी परस्पर युद्धज करवा लाग्या. ॥ ६४ ॥

**शिलीमुखा मिथश्छिन्नाः क्षोणीगतमुखास्तयोः । कबन्धैरिव पश्चार्धैर्ननृतुर्युद्धमूर्धनि ॥ ६५ ॥**

अन्वयः–मिथः छिन्नाः, क्षोणी गत मुखाः तयोः शिलीमुखाः कबंधैः इव पश्चार्धैः युद्ध मूर्धनि ननृतुः ॥ ६५ ॥

अर्थः–परस्पर कपाइ गयेलां, तथा जमीनमां खुंची गयेलां मुखोवाळां, तेओ बन्नेनां बाणो कबंधोनी पेठे (बहार रहेला) उपरना अर्ध भागोवडे युद्धना मस्तकपर (संग्रामना मेदानमां) नाचवा लाग्यां. ॥ ६५ ॥

**छिन्नमध्या अपि शरा बहुवेगबलोद्धताः । तयोर्लक्ष्यं ययुः केऽपि कोपना इव पन्नगाः ॥ ६६ ॥**

अन्वयः–छिन्न मध्याः अपि तयोः के अपि शराः, बहु वेगबल उद्धताः, कोपनाः पन्नगाः इव लक्ष्यं ययुः. ॥ ६६ ॥

अर्थः–छेदाइ गया छे मध्य भागो जेना, एवां पण तेओनां केटलांक बाणो, अति वेगथी उछळताथका क्रोध पामेला सर्पोनी पेठे

देखावा लाग्यां. (अथवा लक्ष्यप्रते जवा लाग्या.) ॥ ६६ ॥

**क्रुधारुणमुखौ श्यामौ बाणपञ्जरमध्यगौ । जग्मतुः केलिकीरत्वं वाग्मिनौ तौ जयश्रियः ॥ ६७ ॥**

अन्वयः—क्रोध अरुण मुखौ, श्यामौ, बाण पंजर मध्य गौ, वाग्मिनौ तौ जय श्रियः केलि कीरत्वं जग्मतुः ॥ ६७ ॥

अर्थः—क्रोधथी लाल मुखवाळा, श्याम कांतिवाळा, तथा बाणोरूपी पांजरांमां रहेला, अने वाचाल एवा तेओ बन्ने जयलक्ष्मीना क्रीडा करवाना शुकपणाने पाम्या. ॥ ६७ ॥

**तुल्योद्यमबलौ तुल्यकृतिप्रतिकृतिक्रमौ । तौ तुल्यलक्षणौ वीक्ष्य भग्नाशोऽभूत्पराजयः॥ ६८ ॥**

अन्वयः—तुल्य उद्यम बलौ, तुल्य कृति प्रतिकृति क्रमौ, तुल्य लक्षणौ तौ वीक्ष्य पराजयः भग्न आशः अभूत्. ॥ ६८ ॥

अर्थः—सरखा उद्यम अने बलवाळा, सरखां कार्य अने प्रतिकार्यना अनुक्रमवाळा, तथा सरखां लक्षणोवाळा तेओ बन्नेने जोइने पराजय तो निराश थइ गयो. ॥ ६८ ॥

**स्वयं जयश्रियैकैकबाहुनालिङ्गिताविव । केन केन महास्त्रेण चक्रतुर्विक्रमं न तौ ॥ ६९ ॥**

अन्वयः—जय श्रिया एक एक बाहुना आलिंगितौ इव, तौ केन केन महास्त्रेण विक्रमं न चक्रतुः. ॥ ६९ ॥

अर्थः—जयलक्ष्मीए (पोताना) एकेक हाथथी जाणे पकडेला होय नही! एवा तेओ बन्ने कयां कयां महान् शस्त्रथी पोतानुं पराक्रम न फोरववा लाग्या? ॥ ६९ ॥

**अत्रान्तरेण मत्वाथ दुर्जयं विजयानुजम् । दुर्निरीक्षतरं चक्रे करं चक्रेण तारकः ॥ ७० ॥**

अन्वयः–अथ अस्त्र अंतरेण विजय अनुजं दुर्जयं मत्वा तारकः चक्रेण करं दुर्निरीक्षतरं चक्रे. ॥ ७० ॥

अर्थः–पछी बीजां शस्त्रोथी विजयना न्हाना भाइ द्विपृष्टवासुदेवने दुर्जय मानीने ते तारकप्रतिवासुदेवे चक्रवडे करीने (पोताना) हाथने अति कष्टथी जोइ शकाय एवो कर्यो, ( अर्थात् हाथमां तेजस्वी चक्र धारण कर्युं.) ॥ ७० ॥

**जीवितव्यमिवार्कस्य रहस्यमिव विद्युताम् । चक्रं चित्तमिवाग्नेस्तज्ज्वलत्कः प्रेक्ष्य नात्रसत् ॥ ७१ ॥**

अन्वयः–अर्कस्य जीवितव्यं इव, विद्युतां रहस्यं इव, अग्नेः चित्तं इव, तत् ज्वलत् चक्रं प्रेक्ष्य कः न अत्रसत्? ॥ ७१ ॥

अर्थ—सूर्यनां जीवनसरखां, विजळीओना सारसरखां, तथा अग्निना हृदयसरखां ते जाज्वल्यमान चक्रने जोइने कोण त्रास पाम्युं नही? ॥ ७१ ॥

**तादृक्प्रभावभृच्चक्रं न किंचिदिति चिन्तयन् । पीतवान्पीतवासास्तदृक्ताराकान्तिवारिदैः ॥ ७२ ॥**

अन्वयः—तादृक् प्रभाव भृत् चक्रं न किंचित्, इति चिंतयन् पीत वासाः दृक् तारा कांति वारिदैः तत् पीतवान्. ॥ ७२ ॥

अर्थः–तेवां माहात्म्यवाळुं आ चक्र तो कंइज वीसातमां नथी, एम चिंतवता ते पीतांबर ( वासुदेव पोतानी ) आंखोनी कीकीओनां तेजरूपी वादळांओवडे तेने पी गया. ॥ ७२ ॥

**चक्रेण जितमेवेति मन्यमानस्तु तारकः । तर्जयन्निव दृष्ट्यैव प्रहसन्हरिमाह सः ॥ ७३ ॥**

अन्वयः—चक्रेण जितं एव, इति मन्यमानः सः तारकः तु, दृष्टया एव तर्जयन् इव, प्रहसन् हरिं आह. ॥ ७३ ॥
अर्थः—आ चक्रथी मारी जीत थइज छे, एम मानतो ते तारक तो दृष्टिथीज जाणे तिरस्कार करतो होय नही! तेम हांसी करतोथको विष्णुने कहेवा लाग्यो के, ॥ ७३ ॥

**चिरसेवकसूनुर्मे दुर्मेधा इति वध्यसे । मदाज्ञां श्रय भो डिम्भ भुंक्ष्व भोगान्म्रियस्व मा ॥ ७४ ॥**

अन्वयः—मे चिर सेवक सूनुः दुर्मेधाः इति वध्यसे, भो डिंभ! मदाज्ञां श्रय? भोगान् भुंक्ष्व? मा म्रियस्व? ॥ ७४ ॥
अर्थः—मारा घणा काळना सेवकनो पुत्र थइने तुं दुर्बुद्धि निवडेलो छे, माटे तारो वध करवानो छे, माटे हे गभरु! (हजु पण) तुं मारी आज्ञा स्वीकार? अने भोगो भोगव? (नाहक) न मार्यो जा? ॥ ७४ ॥

**हरिराह त्वदस्त्राणां प्रमाणं ददृशे मया । मुञ्च चक्रमपीदानीं पश्याम्यस्याप्यहं महः ॥ ७५ ॥**

अन्वयः—हरिः आह, त्वद् अस्त्राणां प्रमाणं मया ददृशे, इदानीं चक्रं अपि मुंच? अस्य अपि महः अहं पश्यामि. ॥ ७५ ॥
अर्थः—त्यारे विष्णुए कह्युं के, तारां शस्त्रोनुं प्रमाण में जोयुं छे, हवे आ चक्रने पण मूक? के जेथी तेना तेजने (पण) हुं जोउं.

**इत्युक्त्वा कुपितश्चक्रं भ्रमयित्वा रयेण खे । तं प्रति त्रस्तचन्द्रार्कतारकं तारकोऽमुचत् ॥ ७६ ॥**

अन्वयः—इति उक्त्वा कुपितः तारकः त्रस्त चंद्र अर्क तारकं चक्रं रयेण खे भ्रमयित्वा तंप्रति अमुचत् ॥ ७६ ॥
अर्थः—एम कहेवाथी क्रोध पामेला ते तारके, चंद्र, सूर्य तथा ताराओने पण त्रास आपनारां ते चक्रने वेगथी आकाशमां भमा-

वीने तेनापर मूक्यु. ॥ ७६ ॥

**स्नेहाज्जयश्रिया कर्णकुण्डलेनेव केशवः । नाभ्या हृदि हतस्तेन चक्रेण सुखमूर्छितः ॥ ७७ ॥**

अन्वयः—जय श्रिया स्नेहात् कर्णकुंडलेन इव, तेन चक्रेण नाभ्या हृदि हतः केशवः सुख मूर्छितः. ॥ ७७ ॥

अर्थः—जयलक्ष्मीए स्नेहथी जाणे कर्णना कुंडलसरखा ते चक्रे धरीवडे छातीमां हणेला ते विष्णु सुखमूर्छा पाम्या. ॥ ७७ ॥

**अतिज्वलयतेवाथ तत्प्रतापहुताशनम् । वीजितो व्यजनीकृत्य वासोऽन्तं विजयेन सः ॥ ७८ ॥**

अन्वयः—अथ तत् प्रताप हुताशनं अतिज्वलयता इव, विजयेन वासः अंतं व्यजनीकृत्य सः वीजितः. ॥ ७८ ॥

अर्थः—पछी ते विष्णुना प्रतापरूपी अग्निने जाणे अत्यंत जाज्वल्यमान करता होय नही! तेम विजयबलदेवे वस्त्रना छेडाने वीं-झणारूप करीने तेने पवन नाख्यो. ॥ ७८ ॥

**तदेव चक्रमुद्भ्रम्य मूर्छान्ते तं हरिर्जगौ । मुञ्चाग्रभागं मुञ्चामि जीवन्तं भुंक्ष्व भो भुवम् ॥ ७९ ॥**

अन्वयः—मूर्छा अंते तत् एव चक्रं उद्भ्रम्य हरिः तं जगौ, भोः अग्र भागं मुंच? जीवंतं मुंचामि, भुवं भुंक्ष्व? ॥ ७९ ॥

अर्थः—पछी मूर्छाने अंते तेज चक्रने भमावीने विष्णुए तारकने कह्युं के, अरे! तुं (मारी) आगळथी खसी जा? तने जीवतो मूकुं छुं, माटे पृथ्वी (तारुं राज्य) भोगव? ॥ ७९ ॥

**क्रुधा रक्तभ्रमचक्षुस्तारकस्तारकस्ततः । ऊचे तं दन्तपेषोत्थस्फुलिङ्गावलिनींगिरम् ८० ॥**

अन्वयः-ततः क्रुधा रक्त भ्रमत् चक्षुः तारकः तारकः तं दंत पेष उत्थ स्फुलिंग आवलिनीं गिरं ऊचे. ॥ ८० ॥

अर्थः-पछी क्रोधथी लाल थयेली आंखोमां भमती कीकीओवाळो ते तारकप्रतिवासुदेव तेनाप्रते दांतो कचकचाववाथी उत्पन्न थयेला तणखाओनी श्रेणिसरखी वाणी बोलवा लाग्यो के, ॥ ८० ॥

**अरे रे मुञ्च मुञ्च द्राग्ममैवेदमनेन हि । हस्तात्तेन पुनर्यत्नान्मुक्तेन त्वच्छिरो हरे ॥ ८१ ॥**

अन्वयः-अरेरे! द्राग् मम एव इदं मुंच मुंच? हि पुनः हस्त आत्तेन यत्नात् मुक्तेन अनेन त्वत् शिरः हरे. ॥ ८१ ॥

अर्थः-अरेरे! ( तुं ) तुरत मारापरज ते चक्र मूक? मूक? केमके फरीने हाथमां लइ चीवटथी मूकेलां एज चक्रथी तारां मस्तकनुं हुं हरण करुं. ॥ ८१ ॥

**इति वाचार्दितः शार्ङ्गी चक्रमुद्भ्रम्य मूर्धनि । द्रागमुञ्चत तच्छिन्नमपश्यच्च द्विषच्छिरः ॥ ८२ ॥**

अन्वयः—इति वाचा अर्दितः शार्ङ्गी चक्रं मूर्धनि उद्भ्रम्य द्राग् अमुंचत, च तत् छिन्नं द्विषत् शिरः अपश्यत्. ॥ ८२ ॥

अर्थः-ए रीतनां वचनथी पीडित थयेला विष्णुए ते चक्रने मस्तकपर भमावीने तुरत मूक्युं, अने तेथी छेदायेलां शत्रुनां मस्तकने तेणे जोयुं. ॥ ८२ ॥

**चिरं प्रतिहरिः प्रीतः संभुज्य विजयश्रियम् ॥ सुष्वाप वीरशय्यायां यशश्रीरावगुण्ठनः ॥ ८३ ॥**

अन्वयः-चिरं विजय श्रियं संभुज्य प्रीतः प्रतिहरिः, यशः चीर अवगुंठनः वीर शय्यायां सुष्वाप. ॥ ८३ ॥

अर्थः—( एरीते ) घणा काळसुधी जयलक्ष्मीने भोगवीने खुशी थयेलो ते प्रतिवासुदेव, यशरूपी वस्त्र ओढीने शूरवीरोनी शय्यामां सूतो. ॥ ८३ ॥

**स्वनामशत्रुसंहारसंप्रीतैरिव तारकैः । पुष्पवृष्टिश्रियागामि विष्णुं सेवितुमम्बरात् ॥ ८४ ॥**

अन्वयः-स्व नाम शत्रु संहार संप्रीतैः तारकैः इव, अंबरात् पुष्प वृष्टि श्रिया विष्णुं सेवितुं आगामि. ॥ ८४ ॥

अर्थः-पोताना नामवाळा शत्रुना विनाशथी खुशी थयेला जाणे ताराओ आव्या होय नही! तेम आकाशमांथी पुष्पवृष्टिनी लक्ष्मी विष्णुनी सेवा करवाने आवी. ॥ ८४ ॥

**जिगाय गायनोद्गीतगुणग्रामो रणं हरिः । स केन जीयतां यस्यानुयायी विजयः स्वयम् ॥ ८५ ॥**

अन्वयः—गायन उद्गीत गुण ग्रामः हरिः रणं जिगाय, स्वयं विजयः यस्य अनुयायी, सः केन जीयतां? ॥ ८५ ॥

अर्थः—गीतोथी गवायेला छे गुणग्रामो जेना, एवा ते विष्णुए रणसंग्राममां विजय मेळव्यो, विजय ( बलदेव ) पोते जेना अनुयायी छे, ते विष्णुने कोण जीती शके? ॥ ८५ ॥

**चक्रं च राजचक्रं च तारकस्य तदद्भुतम् । लग्नं हस्ते च पादे च किं करोमीति शार्ङ्गिणः ॥ ८६ ॥**

अन्वयः-तारकस्य चक्रं च राजचक्रं च, किं करोमि? इति शार्ङ्गिणः हस्ते च पादे च लग्नं, तद् अद्भुतं. ॥ ८६ ॥

अर्थः—ते तारकनुं चक्र, अने राजाओनो समूह, हवे हुं शुं करुं ? एम विचारता विष्णुना हाथमां अने पगमां आवी पड्यां, ए आश्चर्य छे! ॥ ८६ ॥

**भरतार्धजयारम्भससंरम्भहृदो हरेः । चक्रमेवाभवज्जेयदेशमार्गोपदेशकम् ॥ ८७ ॥**

अन्वयः—भरत अर्ध जय आरंभ ससंरंभ हृदः हरेः, चक्रं एव जेय देश मार्ग उपदेशकं अभवत्. ॥ ८७ ॥

अर्थः—अर्ध भरतना विजयना आरंभनी उत्सुकतावाळुं छे हृदय जेनुं, एवा ते विष्णुने ते चक्रज जीतवाना देशोनो मार्ग देखाडनारुं थयुं. ॥ ८७ ॥

**दक्षिणं भरतार्धं स सार्धं सर्वैर्धराधवैः । तयैव यात्रया जैत्रः साधयामास माधवः ॥ ८८ ॥**

अन्वयः—जैत्रः सः माधवः तया एव यात्रया सर्वैः धरा धवैः सार्धं दक्षिणं भरत अर्धं साधयामास. ॥ ८८ ॥

अर्थः—विजय पामेला ते विष्णुए तेज प्रयाणथी सर्व राजाओनी साथे दक्षिण भरतार्धने जीती लीधो. ॥ ८८ ॥

**जनवन्मागधाधीशं वरदामेश्वरं च सः । प्रभासप्रभुमप्येतान्देवान्सेवागिरोऽकरोत् ॥ ८९ ॥**

अन्वयः—च सः मागध अधीशं, च वरदाम ईश्वरं, प्रभास प्रभुं अपि, एतान् देवान् जनवत् सेवा गिरः अकरोत्. ॥ ८९ ॥

अर्थः—पछी तेणे मागधतीर्थना स्वामीने, तथा वरदामतीर्थना स्वामीने, अने प्रभासतीर्थना स्वामीने, एम ते देवोने पण माणसनीपेठे सेवानां वचनो बोलनारा कर्या, (अर्थात् तेओने पोताना सेवको कर्या.) ॥ ८९ ॥

आगमन्मगधान्यात्राविनिवृत्तोऽच्युतस्ततः । तत्र व्यलोकयत्कोटिनरोत्पाट्यां महाशिलाम् ॥ ९० ॥

अन्वयः–ततः यात्रा विनिवृत्तः अच्युतः मगधान् आगमत्, तत्र कोटि नर उत्पाट्यां महाशिलां व्यलोकयत्. ॥ ९० ॥

अर्थः—पछी ते प्रयाणयात्राथी पाछा फरेला विष्णु मगधदेशमां आव्या, अने त्यां तेमणे क्रोड माणसो उपाडे एवी ( एक ) म्होटी शीला जोइ. ॥ ९० ॥

दूरावलोककुतुको नरः करमिवाच्युतः । लीलयोत्पाटयामास तां ललाटतटावधि ॥ ९१ ॥

अन्वयः—दूर अवलोक कुतुकी नरः करं इव, अच्युतः, तां ललाट तट अवधि लीलया उत्पाटयामास. ॥ ९१ ॥

अर्थः–दूर जोवानी इच्छावाळो मनुष्य जेम (पोतानो)हाथ ललाटने अडाडे छे, तेम ते विष्णुए ते शीलाने छेक पोताना ललाट-सुधी क्रीडामात्रमांज उपाडी. ॥ ९१ ॥

स्थापयित्वा यथास्थानं तामथाङ्गरथाङ्गभृत् । उत्तोरणपुरागारद्वारिकां द्वारिकां ययौ ॥ ९२ ॥

अन्वयः—अथ अंग तां यथास्थानं स्थापयित्वा रथांगभृत् उत्तोरण पुर आगार द्वारिकां द्वारिकां ययौ. ॥ ९२ ॥

अर्थः–पछी आनंदथी ते शिलाने तेनां योग्य स्थानके पाछी मूकीने ते विष्णु नगरनां घरोना दरवाजाओपर ज्यां तोरणो लट-कावेलां छे, एवी द्वारिकानगरीमां गया. ॥ ९२ ॥

हरिः सिंहासनेऽध्यास्य जनकेनाग्रजेन च । सर्वैरुर्वीधवैश्चार्धचक्रित्वे सोऽभ्यषिच्यत ॥ ९३ ॥

अन्वयः—जनकेन च अग्रजेन, च सर्वैः उर्वीधवैः सिंहासने अध्यास्य सः अर्धचक्रित्वे अभ्यषिच्यत. ॥ ९३ ॥

अर्थः—पछी पिताए, म्होटा भाइए (बलदेवे) तथा सर्व राजाओए मळीने, सिंहासनपर बेसाडीने ते विष्णुनो अर्धचक्रीपणानी राज्यगादीपर अभिषेक कर्यो. ॥ ९३ ॥

**नीतिं वितत्य पृथ्वीं स पृथ्वीं पृथ्वीपुरन्दरः । अपालयद्वनीपाल इव बालद्रुमावलीम् ॥ ९४ ॥**

अन्वयः—वनीपालः बाल द्रुम आवलीं इव सः पृथ्वीपुरंदरः पृथ्वीं नीतिं वितत्य पृथ्वीं अपालयत्. ॥ ९४ ॥

अर्थः—बगीचानो रक्षक माली जेम वृक्षोनां छोडवाओनी श्रेणिनुं रक्षण करे छे, तेम ते पृथ्वीन्द्रे विशाल नीतिनो विस्तार करीने पृथ्वीनुं रक्षण कर्युं. ॥ ९४ ॥

**तदा च नाथश्छद्मस्थावस्थाप्रस्थापिताशुभः । विहृत्य वर्षमासन्नकेवलोत्पत्तिवासरः ॥ ९५ ॥**

**श्रीवासुपूज्यो दृक्पूतामंघ्रिभिः पावयन्महीम् । चम्पापुर्यां व्रतारामेऽगाद्विहारगृहाभिधे ॥ ९६ ॥ युग्मं ॥**

अन्वयः—च तदा छद्मस्थ अवस्था प्रस्थापित अशुभः, आसन्न केवल उत्पत्ति वासरः श्रीवासुपूज्यः वर्षं विहृत्य, दृक् पूतां महीं अंघ्रिभिः पावयन् चंपा पुर्यां विहारगृह अभिधे व्रत आरामे अगात्. ॥ ९५ ॥ ९६ ॥ युग्मं ॥

अर्थः—पछी ते वखते छद्मस्थ अवस्थामां दूर करेल छे पापो जेमणे, तथा नजीकमां छे केवलज्ञान उत्पन्न थवानो दिवस जेमनो,

एवा ते श्रीवासुपूज्यप्रभु, एक वर्षसुधी विचरीने, दृष्टिथी पवित्र करेली पृथ्वीने (पोतानां) चरणोवडे पवित्र करताथका चंपानगरीमां विहारगृह नामना बगीचामां, के ज्यां तेमणे चारित्र स्वीकार्युं हतुं, त्यां गया. ॥ ९५ ॥ ९६ ॥ युग्मं ॥

**पाटलातरुमूलेऽथ श्रिततुर्यतपाः प्रभुः । प्रतिमास्थो गुणस्थानमप्रमत्ताख्यमाप्तवान् ॥ ९७ ॥**

अन्वयः—अथ श्रित तुर्य तपाः प्रभुः पाटलातरु मूले प्रतिमास्थः अप्रमत्त आख्यं गुणस्थानं आप्तवान्. ॥ ९७ ॥

अर्थः—पछी करेल छे उपवासनो तप जेमणे एवा ते प्रभु पाटलवृक्षनी नीचे कायोत्सर्गध्याने रह्याथका अप्रमत्तनामना गुणस्थानने प्राप्त थया हता. ॥ ९७ ॥

**अपूर्वकरणारूढः प्रतिपेदे ततः प्रभुः । सविचारं सितध्यानं पृथक्त्वेन वितर्कयुक् ॥ ९८ ॥**

अन्वयः—ततः अपूर्व करण आरूढः प्रभुः पृथक्त्वेन वितर्कयुक् सविचारं सित ध्यानं प्रतिपेदे. ॥ ९८ ॥

अर्थः—पछी अपूर्वकरण गुणस्थाने चडेला प्रभु "पृथक्त्ववितर्कसविचार" नामना शुक्ल ध्यानना पेहेला पायाने प्राप्त थया.

**अनिवृत्तिं ततः सूक्ष्मसंपरायगुणं गुरुः । अधिगम्याध्यरोहच्च क्षणात्क्षीणकषायताम् ॥ ९९ ॥**

अन्वयः—ततः गुरुः अनिवृत्तिं सूक्ष्म संपराय गुणं अधिगम्य, च क्षणात् क्षीण कषायतां अध्यारोहत्. ॥ ९९ ॥

अर्थः—पछी प्रभु अनिवृत्ति तथा सूक्ष्मसंपरायनामना बन्ने गुणस्थानको पामीने तथा पछी क्षणवारमां क्षीणकषायनामना गुणस्थानपर आरूढ थया. ॥ ९९ ॥

**शुक्लध्यानमवीचारमैक्यश्रुतमथ प्रभुः । मोहान्तिमक्षणे क्षीणे द्वितीयं प्रत्यपद्यत ॥ १०० ॥**

अन्वयः-अथ प्रभुः मोह अंतिम क्षणे क्षीणे अवीचारं ऐक्यश्रुतं द्वितीयं शुक्ल ध्यानं प्रत्यपद्यत. ॥ १०० ॥

अर्थः—पछी प्रभु मोहना छेल्ला क्षणनो क्षय थतां अवीचार ऐक्यश्रुत (एकत्ववितर्कअविचार) नामना शुक्लध्यानना बीजा पायाने प्राप्त थया. ॥ १०० ॥

**पञ्चज्ञानावृतीरीशश्चतस्रो दर्शनावृतीः । अन्तरायांश्च पञ्चेति घातिकर्माण्यनाशयत् ॥ १ ॥**

अन्वयः-ईशः पंच ज्ञान आवृतीः, चतस्रः दर्शन आवृतीः, च पंच अंतरायान्, इति घाति कर्माणि अनाशयत्. ॥ १ ॥

अर्थः-(पछी) प्रभुए पांच ज्ञानावरणीय, चार दर्शनावरणीय, अने पांच अंतराय, एरीतनां घातिकर्मोनो नाश कर्यो. ॥ १ ॥

**माघे सितद्वितीयायां चन्द्रे शतभिषग्युजि । केवलज्ञानमुदभूद्विश्वोद्भासि प्रभोस्ततः ॥ २ ॥**

अन्वयः-ततः माघे सित द्वितीयायां, चंद्रे शतभिषक् युजि, प्रभोः विश्व उद्भासि केवल ज्ञानं उदभूत्. ॥ २ ॥

अर्थः-पछी महामासनी सुदि बीजने दिवसे, चंद्रनी साथे शतभिषक् नक्षत्रनो योग थाते छते प्रभुने समस्त जगतनो प्रकाश करनारुं केवलज्ञान उत्पन्न थयुं. ॥ २ ॥

**प्रसत्तिं हरितो भेजुर्वायवः सुखदा ववुः । क्षणं तदा सुखं प्रापुर्दुःप्रापं नारका अपि ॥ ३ ॥**

अन्वयः-तदा हरितः प्रसत्तिं भेजुः, सुखदाः वायवः ववुः, नारकाः अपि क्षणं दुःप्रापं सुखं प्रापुः. ॥ ३ ॥

अर्थः-ते वखते दिशाओ शांतिने प्राप्त थइ, सुखदाइ वायु वावा लाग्या, अने नारकीओ पण क्षणवारसुधी दुर्लभ सुखने प्राप्त थया.

**चकम्पिरे सुरेन्द्राणामासनान्यथ सर्वतः । शिरांसीव विमानानां विभुवैभववीक्षणात् ॥ ४ ॥**

अन्वयः—अथ विभु वैभव वीक्षणात् विमानानां सुर इंद्राणां शिरांसि इव सर्वतः आसनानि चकंपिरे. ॥ ४ ॥

अर्थः-पछी प्रभुनो वैभव जोइने जाणे गर्वरहित थयेला सुरेंद्रोनां मस्तकोनीपेठे सर्व जगोएथी (तेमनां) आसनो कंपवा लाग्यां.

**एतैत यात यातेशं नन्तुमित्यादिशन्निव । स्वर्लोकानिन्द्रलोकेषु महाघण्टाः स्फुटस्वनैः ॥ ५ ॥**

अन्वयः-ईशं नंतुं एत? एत? यात? यात? इति इन्द्र लोकेषु स्फुट स्वनैः महाघंटाः स्वर्लोकान् आदिशन् इव. ॥ ५ ॥

अर्थः—प्रभुने नमवाने आवो ? आवो ? जाओ ? जाओ ? एम देवलोकोमां प्रगट शब्दोथी महाघंटाओ जाणे देवोने हुकम करवा लाग्या. ॥ ५ ॥

**सुधर्मेशस्य तीर्थेशं नन्तुमागन्तुमिच्छतः । ऐरावणसुरः स्मृत्या करीभूय पुरोऽभवत् ॥ ६ ॥**

अन्वयः—तीर्थ ईशं नंतुं आगंतुं इच्छतः सुधर्म ईशस्य स्मृत्या ऐरावण सुरः करीभूय पुरः अभवत्. ॥ ६ ॥

अर्थः-तीर्थंकरप्रभुने नमवा आववाने इच्छता एवा सुधर्मेंद्रना स्मरणथी ऐरावण देव हाथीनुं स्वरूप धारण करीने आगळ आवी उभो.

**लक्षयोजनमानाङ्गः शुभश्रीरभ्रमूविभुः । रौप्याद्रिरिव हेमाद्रिस्पर्धया तुङ्गतां गतः ॥ ७ ॥**

अन्वयः-लक्ष योजन मान अंगः, शुभ श्रीः अभ्रमूविभुः हेम अद्रि स्पर्धया रौप्य अद्रिः इव तुंगतां गतः. ॥ ७ ॥

सान्वय भाषांतर ॥१२२८॥

अर्थः—एकलाख जोजनप्रमाण शरीरवाळो अने मनोहर शोभावाळो ते ऐरावण हाथी जाणे मेरुपर्वतनी स्पर्धाथी (रौप्यमयवैताढ्य) पर्वतनीपेठे उंचो थयो. ॥ ७ ॥

**जिनं यियासोस्तस्योच्चैर्मदधारायुगच्छलात् । पापं निकाचितं चानिकाचितं च गलद्बभौ ॥ ८ ॥**

अन्वयः—जिनं यियासोः तस्य उच्चैः मद धारा युगच्छलात् निकाचितं च अनिकाचितं च पापं गलत् बभौ. ॥ ८ ॥

अर्थः—प्रभुनीपासे जवानी इच्छावाळा ते ऐरावण हाथीनुं, अति झरती बे मदधाराना मिषथी निकाचित अने अनिकाचित पाप गलतुंथकुं देखावा लाग्युं. ॥ ८ ॥

**गर्जितैश्च महाघण्टाटणत्कारयुगैश्च सः । व्यराजत जिनं नन्तुं त्रिलोकीमाह्वयन्निव ॥ ९ ॥**

अन्वयः—सः गर्जितैः च महाघंटा टणत्कार युगैः च जिनं नंतु त्रिलोकीं आह्वयन् इव व्यराजत. ॥ ९ ॥

अर्थः—ते हाथी गर्जारवोथी तथा बे महान घंटाओना टणत्कारोथी प्रभुने नमवाने जाणे त्रणे लोकने बोलावतो होय नही! तेम शोभतो हतो. ॥ ९ ॥

**स्वर्णपट्टाढ्यभालानि तस्याष्टौ वदनान्यभान् । प्रभुवाक्श्रवणोत्कण्ठाः प्रत्यक्षा इव धीगुणाः ॥ १० ॥**

अन्वयः—प्रभु वाक् श्रवण उत्कंठाः प्रत्यक्षाः धी गुणाः इव, तस्य स्वर्ण पट्ट आढ्य भालानि अष्टौ वदनानि अभान्. ॥१०॥

अर्थः—प्रभुनी वाणी सांभळवाने ऊत्कंठित थयेला जाणे प्रत्यक्ष बुद्धिना गुणो होय नहीं! तेम ते हाथीनां सुवर्णपट्ट बांधेलां ललाटो-

वाळां आठ मुखो शोभतां हतां. ॥ १० ॥

**वदने वदने चाष्टौ दशनास्तस्य रेजिरे । चतुःषष्टिकलाश्रीणां केलितल्पतला इव ॥ ११ ॥**

अन्वयः—च तस्य वदने वदने अष्टौ दशनाः, चतुः षष्टि कला श्रीणां केलि तल्प तलाः इव रेजिरे. ॥ ११ ॥

अर्थः—वळी ते हाथीना दरेक मुखपर रहेला आठ आठ दांतो, चोसठ कलाओनी लक्ष्मीओने क्रीडा करवानी शय्याओनां पीठोनीपेठे शोभता हता. ॥ ११ ॥

**दशने दशने वापी स्वादुस्वच्छहिमोदका । कीर्तिर्मूर्तिमतीवास्य वपुःसामर्थ्यसंभवा ॥ १२ ॥**

अन्वयः—वपुः सामर्थ्य संभवा अस्य मूर्तिमती कीर्तिः इव, स्वादु स्वच्छ हिम उदका वापी दशने दशने. ॥ १२ ॥

अर्थः—शरीरना सामर्थ्यथी उत्पन्न थयेली, ते हाथीनी शरीरधारी कीर्तिसरखी स्वादिष्ट, निर्मल अने ठंडा जलवाळी वावडी (तेना) दरेक दांतोपर (शोभती हती.) ॥ १२ ॥

**अष्टाष्ट जलजन्मानि वाप्यां वाप्यां विरेजिरे । विकासीन्यष्टदिक्कान्तावदनप्रतिबिम्बवत् ॥ १३ ॥**

अन्वयः—वाप्यां वाप्यां अष्ट दिक् कांता वदन प्रतिबिंबवत् अष्ट अष्ट विकासीनि जल जन्मानि विरेजिरे. ॥ १३ ॥

अर्थः—ते दरेक वावडीओमां आठ दिशाओरूपी स्त्रीओना मुखोना प्रतिबिंबोसरखां आठ आठ विकस्वर कमलो शोभतां हतां.

**कमले कमलेऽष्टाष्ट दलानि दधिरे द्युतिम् । अत्युत्स्तानि तीर्थेशविलोककुतुकादिव ॥ १४ ॥**

अन्वयः—तीर्थ ईश विलोक कुतुकात् अति उत्स्रुतानि इव, कमले कमले अष्ट अष्ट दलानि द्युतिं दधिरे. ॥ १४ ॥

अर्थः—तीर्थंकर प्रभुने जोवाना कौतुकथी जाणे अति उंचां थयां होय नही! तेम दरेक कमलोपर आठ आठ पांखडांओ शोभी रह्यां हतां. ॥ १४ ॥

**चतुर्धाभिनयस्मेररसप्रसरलीलया । शुभान्यभूवन्नष्टाष्ट नाटकानि दले दले ॥ १५ ॥**

अन्वयः-दले दले चतुर्धा अभिनय स्मेर रस प्रसर लीलया शुभानि अष्ट अष्ट नाटकानि अभूवन्. ॥ १५ ॥

अर्थः—वळी ते दरेक पांखडांओपर चार प्रकारना अभिनयथी उल्लासित थयेला रसना फेलावानी लीलाथी मनोहर देखातां आठ आठ नाटको हतां. ॥ १५ ॥

**प्रभुभक्तिभरव्यक्तीभूतस्वस्वगुणान्यथ । नाटके नाटके पात्राण्यत्र द्वात्रिंशदस्फुरन् ॥ १६ ॥**

अन्वयः—अथ अत्र नाटके नाटके प्रभुभक्ति भर व्यक्तीभूत स्व स्व गुणानि द्वात्रिंशत् पात्राणि अस्फुरन्. ॥ १६ ॥

अर्थः—वळी ते दरेक नाटकमां प्रभुनी भक्तिना समूहथी प्रगट थयेल छे पोतपोताना गुणो जेओनां, एवां बत्रीस बत्रीस पात्रो शोभतां हतां. ॥ १६ ॥

**इति चित्रीयमाणश्रीशालिनं गुणमालिनम् । करोत्पातेन कुर्वन्तमाकाश इव जाह्नवीम् ॥ १७ ॥**

**सुरभिश्वासदेवद्रुकुसुमस्रग्मदाम्बुभिः । त्रिधा संप्रीणितैर्भृङ्गैर्गीतकीर्तिमिवाभितः ॥ १८ ॥**

जगत्स्वामिनमस्कारमनोरथमिवोन्नतम् । आरोहद्वारणं वेगात्तं हरिः सपरिच्छदः ॥ १९ ॥

अन्वयः-इति चित्रीयमाण श्री शालिनं, गुण मालिनं, कर उत्पातेन आकाशे जाह्नवीं कुर्वंतं इव, ॥ १७ ॥ सुरभि श्वास देव द्रु कुसुम स्रग् मद अंबुभिः, त्रिधा संप्रीणितैः भृंगैः अभितः गीत कीर्तिं इव, ॥ १८ ॥ जगत् स्वामि नमस्कार मनोरथं इव उन्नतं तं वारणं सपरिच्छदः हरिः वेगात् आरोहत्. ॥ १९ ॥ त्रिभिर्विशेषकं ॥

अर्थः-एरीते आश्चर्यकारक शोभाथी मनोहर लागता, गुणोथी भरेला, सूंढने उंची उछाळवाथी जाणे आकाशमां गंगानदीनो देखाव करता, ॥१७॥ सुगंधी श्वास, कल्पवृक्षोनां पुष्पोनी माळाओ, तथा मदजलथी एम त्रण प्रकारे खुशी करेला भमराओवडे जाणे चोतरफथी गवायेली कीर्तिवाळा, ॥ १८ ॥ जगतना स्वामी, एवा श्री तीर्थंकर प्रभुने नमस्कार करवाना मनोरथनीपेठे उंचा, एवा ते ऐरावण हाथीपर परिवारसहित इन्द्र वेगथी आरूढ थया. ॥ १९ ॥ त्रिभिर्विशेषकं ॥

स्कन्धबद्धासने जिष्णौ स सिन्धुरसुरस्ततः । स्वामिसेवोत्सुकमनास्त्वराकृष्ट इवाचलत् ॥ २० ॥

अन्वयः-जिष्णौ स्कंध बद्ध आसने, सः सिंधुरसुरः स्वामि सेवा उत्सुक मनाः, त्वरा आकृष्टः इव ततः अचलत्. ॥ २० ॥

अर्थः—(एरीते) तेना स्कंधपर इन्द्र बेठाबाद ते ऐरावण देव, प्रभुनी सेवामाटे उत्सुक मनवाळो थयोथको जाणे उतावळथी खेंचायो होय नही! तेम त्यांथी चालवा लाग्यो. ॥ २० ॥

प्राक्पालक इवात्मानं संक्षिपन्स क्षणादपि । जगाम स्वामिपादाब्जपूतमुद्यानभूतलम् ॥ २१ ॥

अन्वयः-प्राक्पालकः इव सः आत्मानं संक्षिपन् क्षणात् अपि स्वामि पाद अब्ज पूतं उद्यान भूतलं जगाम. ॥ २१ ॥

अर्थः-पछी पूर्वे वर्णवेलां पालक विमाननीपेठे ते ऐरावण हाथी पण पोताने संक्षेपतोथको क्षणवारमां प्रभुना चरणकमलोथी पवित्र थयेलां उद्याननां भूमितलपर गयो. ॥ २१ ॥

**उत्ततार ततस्तारसारालंकारवारभृत् । सौधर्मस्वाम्यसौ धर्मस्वामिनं नन्तुमुद्यतः ॥ २२ ॥**

अन्वयः-तार सार अलंकार वार भृत् असौ सुधर्मस्वामी धर्म स्वामिनं नंतुं उद्यतः ततः उत्ततार. ॥ २२ ॥

अर्थः-पछी मनोहर उमदां आभूषणोनां समूहने धारण करनारा ते सौधर्मेंद्र, ते धर्मनायक तीर्थंकरने वांदवामाटे उद्यमवंत थयाथका ते हाथीपरथी (नीचे) उतर्या. ॥ २२ ॥

**अर्हंप्रथमिकाध्यानवर्धमानतरत्वराः । अन्येऽपीन्द्राः समं देवैरीयुस्तत्राच्युतादयः ॥ २३ ॥**

अन्वयः-अर्हंप्रथमिका ध्यान वर्धमानतर त्वराः अच्युत आदयः अन्ये अपि इन्द्राः देवैः समं तत्र ईयुः. ॥ २३ ॥

अर्थः-पछी "हुं पेहेलां जाउं, हुं पेहेलां जाउं" एवां ध्यानथी वधारे वधती उतावळवाळा अच्युतआदिक बीजा इन्द्रो पण देवोनी साथे त्यां आव्या. ॥ २३ ॥

**भर्तुः समवसृत्यर्थं कुमारा मरुतस्ततः । अमृजञ्जगतीमेकयोजनां स्वमिव स्वयम् ॥ २४ ॥**

अन्वयः-ततः भर्तुः समवसृति अर्थं मरुतः कुमाराः स्वयं एक योजनां जगतीं स्वं इव अमृजन. ॥ २४ ॥

अर्थः—पछी प्रभुनां समवसरणमाटे वायुकुमारोए पोते एक जोजनना विस्तारवाळी भूमिने पोतानीपेठे (साफ) करी. ॥ २४ ॥

**स्वपोष्यपादपस्तोमदत्तैः पुष्पद्रवैरिव । सिषिचुस्तां भुवं मेघकुमारा गन्धवारिभिः ॥ २५ ॥**

अन्वयः—स्व पोष्य पादप स्तोम दत्तैः पुष्प द्रवैः इव, गंध वारिभिः मेघ कुमाराः तां भुवं सिषिचुः ॥ २५ ॥

अर्थः—पोते पोषेलां वृक्षोनां समूहोए आपेला जाणे पुष्परससरखा गंधोदकवडे मेघकुमारोए ते भूमिपर सिंचन कर्युं. ॥ २५ ॥

**मुक्तामाणिक्यनिष्कैस्तां बबन्धुर्बन्धुरैर्धराम् । व्यन्तराः कर्मभिर्बद्धमात्मानं तु श्लथं व्यधुः ॥ २६ ॥**

अन्वयः—व्यंतराः तां धरां बंधुरैः मुक्ता माणिक्य निष्कैः बबंधुः, कर्मभिः बद्धं आत्मानं तु श्लथं व्यधुः. ॥ २६ ॥

अर्थः—पछी व्यंतरोए ते भूमिने मनोहर मोती, माणिक्य तथा सुवर्णना सिक्काओवडे बांधी, (अने तेम करीने) कर्मोथी बंधायेला पोताना आत्माने तो तेओए ढीलो कर्यो. ॥ २६ ॥

**उन्मुखान्याकिरन्पञ्चवर्णपुष्पाणि तत्र ते । सुगन्धीनि क्षितेरेवोद्गतानीव विना तरून् ॥ २७ ॥**

अन्वयः—तत्र ते, तरून् विना क्षितेः एव उद्गतानि इव, सुगंधीनि, उन्मुखानि पंच वर्ण पुष्पाणि आकिरन्. ॥ २७ ॥

अर्थः—त्यां तेओए वृक्षोविना जाणे पृथ्वीमांथीज उग्यां होय नही! एवां सुगंधी, अने उंचां मुखवाळां पांचे वर्णोनां पुष्पो विखेर्यां.

**मुक्तसुवर्णमाणिक्यैस्ते चतुस्तोरणीमिह । चतुर्गतिकसंसारनिःसारद्वारवद्व्यधुः ॥ २८ ॥**

अन्वयः-इह ते मुक्ता सुवर्ण माणिक्यैः चतुः गतिक संसार निःसार द्वारवत् चतुः तोरणीं व्यधुः. ॥ २८ ॥

अर्थः—पछी अहीं ते व्यंतरोए मोती, सुवर्ण तथा माणिक्योवडे चार गतिवाळा संसारथी निकळवाना दरवाजासरखां चार तोरणो बनाव्यां. ॥ २८ ॥

**दिक्तोरणेषु तेषूच्चैरतिष्ठञ्शालभञ्जिकाः । साक्षान्नु तदधिष्ठानदेवताः सेवितुं विभुम् ॥ २९ ॥**

अन्वयः—तेषु दिक् तोरणेषु, नु विभुं सेवितुं साक्षात् तत् अधिष्ठान देवताः शालभंजिकाः उच्चैः अतिष्ठन्. ॥ २९ ॥

अर्थः-दिशाओमां लटकावेलां ते तोरणोमां प्रभुने सेववामाटे जाणे साक्षात् ते स्थाननी अधिष्ठाता देवीओसरखी उंचे पुतळीओने गोठववामां आवी हती. ॥ २९ ॥

**इन्द्रनीलमयास्तेषु मकरप्रकरा बभुः । प्रबद्धाः सेवने मुक्ता भीतेनेव भवाब्धिना ॥ ३० ॥**

अन्वयः—भीतेन भवाब्धिना सेवने मुक्ताः इव, तेषु प्रबद्धाः इंद्र नीलमयाः मकर प्रकराः बभुः. ॥ ३० ॥

अर्थः-डरेला संसारसागरे (प्रभुने) सेववामाटे जाणे मूक्या होय नही! तेम ते तोरणोमां गुंथेला इन्द्रनील मणिओना बनावेला मगरोना समूहो शोभता हता. ॥ ३० ॥

**चतुर्णामिव धर्माणां चतुर्विधभवच्छिदाम् । स्वाम्यशंसीनि चत्वारि तत्र च्छत्राणि रेजिरे ॥ ३१ ॥**

अन्वयः—चतुर्विध भवच्छिदां चतुर्णां धर्माणां स्वाम्य शंसीनि इव चत्वारि छत्राणि तत्र रेजिरे. ॥ ३१ ॥

अर्थः—चार गतिओवाळा संसारनो नाश करनारा, चार प्रकारना धर्मोनुं जाणे नायकपणुं सूचवतां होय नही! एवां चार छत्रो त्यां शोभतां हतां. ॥ ३१ ॥

**उज्ज्वलः प्रचलस्तेषु विरराज ध्वजव्रजः । मोहं जित्वा पटव्यूहो धर्मसैन्यैरिवाभ्रमि ॥ ३२ ॥**

अन्वयः—मोहं जित्वा धर्मसैन्यैः पट व्यूहः अभ्रमि इव, तेषु उज्ज्वलः प्रबलः ध्वज व्रजः विरराज. ॥ ३२ ॥

अर्थः—मोहने जीतीने धर्मना सैन्योए जाणे विजयवावटाओनो समूह फरकाव्यो होय नही! तेम ते छत्रोपर श्वेत रंगनो चपळ ध्वजानो समूह शोभतो हतो. ॥ ३२ ॥

**बलिपीठेष्विवोच्चेषु भूमिपीठेषु तत्तले । चिह्नानि स्वस्तिकादीनि मङ्गल्यान्यष्ट चाभवन् ॥ ३३ ॥**

अन्वयः—च तत् तले बलि पीठेषु इव उच्चेषु भूमि पीठेषु स्वस्तिक आदीनि अष्ट मंगल्यानि चिह्नानि अभवन्. ॥ ३३ ॥

अर्थः—वळी तेओनी नीचे वेदीओसरखा उंचां पृथ्वीपीठोपर स्वतिक आदि आठ मांगलिक चिह्नो हतां. ॥ ३३ ॥

**भवाब्धिमध्यद्वीपेऽस्मिन्भूमिपीठे विमानिनः । वेलारत्नोच्चयाकारं रत्नप्राकारमादधुः ॥ ३४ ॥**

अन्वयः—भव अब्धि मध्य द्वीपे अस्मिन् भूमि पीठे विमानिनः वेला रत्न उच्चय आकारं प्राकारं आदधुः. ॥ ३४ ॥

अर्थः—संसाररूपी महासागरनी वच्चे रहेला बेटसरखा आ पृथ्वीपीठपर वैमानिक देवोए भरतीवखते बहार निकळीने गोठवाइ गयेलां रत्नोना समूहना गोळ आकारसरखो रत्नोनो प्रकार बनाव्यो. ॥ ३४ ॥

कपिशीर्षचयोऽमुष्मिन्नानामणिमयोऽभवत् । पापाहीन्यत्प्रभापूरमयूरः कस्य नाहरत् ॥ ३५ ॥

अन्वयः–अमुष्मिन् नाना मणिमयः कपि शीर्ष चयः अभवत्, यत् प्रभा पूर मयूरः कस्य पाप अहीन् न अहरत्.? ॥ ३५ ॥

अर्थः–ते प्राकारपर विविध प्रकारनां मणिओनो बनेलो कोंगरांओनो समूह हतो, के जेनी कांतिना समूहरूपी मयूरे कोनां पापोरूपी सर्पोने न हरी लीधा? ॥ ३५ ॥

द्वितीयं तद्बहिर्ज्योतिःपतयः कनकोत्करैः । प्राकारं चक्रुरात्मीयाश्रयान्मेरोरिवाहृतैः ॥ ३६ ॥

अन्वयः—तत् बहिः ज्योतिः पतयः आत्मीय आश्रयात् मेरोः आहृतैः इव कनक उत्करैः द्वितीयं प्राकारं चक्रुः. ॥ ३६ ॥

अर्थः—ते प्राकारनी बहार ज्योतिर्षिंद्रोए पोताना आश्रयभूत मेरुपर्वतपासेथी जाणे खुंचवी लीधेला सुवर्णना समूहोवडे बीजो प्राकार बनाव्यो. ॥ ३६ ॥

ज्योतिषामग्रणीर्भानुर्भूत्वा भूयिष्ठमण्डलः । तत्र स्वयमिव प्राप रत्नालिकपिशीर्षताम् ॥ ३७ ॥

अन्वयः—तत्र ज्योतिषां अग्रणीः भानुः, भूयिष्ठ मंडलः भूत्वा स्वयं इव रत्न आलि कपि शीर्षतां प्राप. ॥ ३७ ॥

अर्थः—ते प्राकारमां ज्योतिषीओनो स्वामी सूर्य घणा मंडलोवाळो थइने पोतानीपेठे रत्नोनी श्रेणिना कोंगरां पणाने पाम्यो.

प्राकारोऽकारि भवनपतिभिश्च ततो बहिः । रजतैर्भगवद्भक्तिगौरैरिव मनोऽणुभिः ॥ ३८ ॥

अन्वयः–च ततः बहिः भवनपतिभिः, भगवद् भक्ति गौरैः मनः अणुभिः इव रजतैः प्राकारः अकारि. ॥ ३८ ॥

अर्थः–वळी ते प्राकारनी बहार भवनपति देवोए प्रभुनी भक्तिथी श्वेत थयेलां ( पोतानां ) हृदयोनां परमाणुओथी जाणे बनाव्यो होय नही! तेम रूपानो प्राकार बनाव्यो. ॥ ३८ ॥

**स्फुरद्भिरुपरि स्वर्णकपिशीर्षकदम्बकैः । चक्रवाकैरिवाभासि शुभ्रे तस्य प्रभाम्भसि ॥ ३९ ॥**

अन्वयः—उपरि स्फुरद्भिः स्वर्ण कपि शीर्ष कदंबकैः, तस्य शुभ्रे प्रभा अंभसि चक्रवाकैः इव आभासि. ॥ ३९ ॥

अर्थः–ते प्राकारपर चळकतां सुवर्णना कोंगरांओना समूहो, ते प्राकारनी श्वेत रंगनी कांतिरूपी जलमां चक्रवाक पक्षिओनीपेठे शोभता हता. ॥ ३९ ॥

**त्रिवप्री नूनमन्योन्यबिम्बबिम्बितबिम्बनात् । अनन्तजन्तुरक्षार्थमिव सानन्तवप्र्यभूत् ॥ ४० ॥**

अन्वयः—सा त्रिवप्री नूनं अन्योऽन्य बिंब बिंबित बिंबनात् अनंत जंतु रक्षार्थं अनंत वप्री इव अभूत्. ॥ ४० ॥

अर्थः–एरीते ए त्रणे प्राकारो खरेखर परस्पर (पोतपोताना) आकारोनां प्रतिबिंबो पडवाथी अनंता प्राणीओनी रक्षामाटे जाणे अनंता प्राकारोनीपेठे थया हता. ॥ ४० ॥

**वैजयन्तीयुजो रेजुस्तत्र माणिक्यतोरणाः । जनं भवभ्रमौ खिन्नमिव वीजयितुं स्थिताः ॥ ४१ ॥**

अन्वयः–तत्र भव भ्रमौ खिन्नं जनं वीजयितुं इव स्थिताः वैजयंती युजः माणिक्य तोरणाः रेजुः. ॥ ४१ ॥

अर्थः-वळी त्यां संसारमां भमवाथी थाकी गयेला लोकोने जाणे पवन नाखवाने रह्या होय नही! तेम पताकाओसहित माणिक्यनां तोरणो शोभतां हतां. ॥ ४१ ॥

**चत्वारि गोपुराणीह वप्रे वप्रे चकासिरे । द्वादशश्राद्धधर्मश्रीविश्रामैकैकजालवत् ॥ ४२ ॥**

अन्वयः-इह द्वादश श्राद्ध धर्म श्री विश्राम एक एक जालवत् वप्रे वप्रे चत्वारि गोपुराणि चकासिरे. ॥ ४२ ॥

अर्थः-वळी त्यां बार प्रकारना श्रावकधर्मनी लक्ष्मीने विश्राम लेवामाटे एकेका झरुखानीपेठे दरेक प्राकारमां चार चार दरवाजा शोभता हता. ॥ ४२ ॥

**लोकपापच्छिदे धूमदण्डव्याजोद्धतासयः । प्रतिद्वारमभाव्यन्त व्यन्तरैर्धूपकुम्भिकाः ॥ ४३॥**

अन्वयः-प्रतिद्वारं व्यंतरैः लोक पाप च्छिदे धूम दंड व्याज उद्धत असयः धूप कुंभिकाः अभाव्यंत. ॥ ४३ ॥

अर्थः—ते दरेक दरवाजे व्यंतरोए लोकोना पापोनो नाश करवामाटे धूमदंडना मिषथी उगामेली तलवारोवाळी धूप घटीओ मेली हती. ॥ ४३ ॥

**तैश्चतुर्विधधर्मश्रीत्रिकालक्रीडनेच्छया । प्रतिद्वारं कृता निष्कपुष्करा पुष्करिण्यपि ॥ ४४ ॥**

अन्वयः—तैः प्रतिद्वारं चतुर्विध धर्म श्री त्रिकाल क्रीडन इच्छया निष्क पुष्करा पुष्करिणी अपि कृता. ॥ ४४ ॥

अर्थः-वळी ते व्यंतरोए दरवाजे दरवाजे चारे प्रकारना धर्मनी लक्ष्मीने त्रणे काल क्रीडा करवानी इच्छाथी सोनेरी कमलवाळी

वावडी पण करी. ॥ ४४ ॥

**तेऽन्तः काञ्चनवप्रस्य चक्रुरुत्तरपूर्वतः । विश्रामायाप्रतिच्छन्दं देवच्छन्दं जगत्प्रभोः ॥ ४५ ॥**

अन्वयः-कांचन वप्रस्य अंतः उत्तर पूर्वतः जगत् प्रभोः विश्रामाय ते अप्रतिच्छंदं देवच्छंदं चक्रुः. ॥ ४५ ॥

अर्थः—सुवर्णना प्राकारनी अंदर ईशानखूणामां प्रभुने विसामो लेवामाटे ते व्यंतरोए ( दिवानखाना जेवो ) अनुपम देवच्छंद बनाव्यो. ॥ ४५ ॥

**प्राङ्मुखे पूर्ववप्रस्य स्वर्णवर्णौ विमानिनौ । द्वाःस्थौ तस्थतुरङ्गार्चिर्मण्डलीकुण्डलायितौ ॥ ४६ ॥**

अन्वयः-पूर्व वप्रस्य प्राङ्मुखे स्वर्ण वर्णौ, अंग अर्चिः मंडली कुंडलायितौ विमानिनौ द्वाःस्थौ तस्थतुः. ॥ ४६ ॥

अर्थः—पेहेला प्राकारना पूर्वतरफना दरवाजापासे सुवर्णसरखा वर्णवाळा, तथा पोताना शरीरना तेजनी श्रेणिथी घेरायेला बे वैमानिक देवो द्वारपालतरीके उभा. ॥ ४६ ॥

**द्वारपौ दक्षिणद्वारि व्यन्तरौ तत्र तस्थतुः । शुभ्राङ्गौ स्वामिभक्तानां यशोधर्माविवाङ्गिनाम् (नौ) ॥४७॥**

अन्वयः—तत्र दक्षिण द्वारि, स्वामि भक्तानां अंगिनां यशः धर्मौ इव शुभ्र अंगौ व्यंतरौ द्वारपौ तस्थतुः. ॥ ४७ ॥

अर्थः-वळी त्यां दक्षिणतरफना दरवाजापर प्रभुना भक्त प्राणीओनां जाणे यश अने धर्म उभा होय नही! तेम श्वेत शरीरवाळा बे व्यंतरो द्वारपालतरीके उभा हता. ॥ ४७ ॥

ज्योतिष्कौ पश्चिमद्वारि द्वारपालौ बभूवतुः। आरक्तवर्णौ सुकृताकृष्टिध्यानवशादिव ॥ ४८ ॥

अन्वयः–पश्चिम द्वारि सुकृत आकृष्टि ध्यान वशात् इव आरक्त वर्णौ ज्योतिष्कौ द्वारपालौ बभूवतुः ॥ ४८ ॥

अर्थः–वळी पश्चिमतरफना दरवाजापर पुण्योना खेंचाणना ध्यानने लीधे जाणे सर्व बाजुथी लाल रंगवाळा थया होय नही! तेम बे ज्योतिषी देवो द्वारपालो तरीके रह्या हता, ॥ ४८ ॥

वप्रलक्ष्म्या मुख इवोत्तरद्वारि सितेतरौ। भवनाधिपती द्वाःस्थौ स्थितावलकवल्लिवत् ॥ ४९ ॥

अन्वयः–वप्र लक्ष्म्याः मुखे इव उत्तर द्वारि भवनाधिपती द्वाःस्थौ अलकवल्लिवत् स्थितौ. ॥ ४९ ॥

अर्थः–ते प्राकारनी लक्ष्मीना मुखसरखा उत्तरतरफना दरवाजापर द्वारपालतरीके उभेला बे भवनपतिदेवो चित्रावेलनीपेठे रहेला हता. ॥ ४९ ॥

अभयं पाशिनं दिव्याङ्कुशं मुद्गरिणं क्रमात्। सर्वा दधत्यश्चन्द्राब्जकनकाञ्जनकान्तयः ॥ ५० ॥
देव्यो जया च विजया चाजिता चापराजिता। प्राक्क्रमेण स्थिताः स्वर्णप्राकारद्वारभूमिषु ॥ ५१ ॥

अन्वयः–क्रमात् सर्वा अभयं, पाशिनं, दिव्य अंकुशं, मुद्गरिणं दधत्यः, चंद्र अब्ज कनक अंजन कांतयः, ॥ ५० ॥ जया, च विजया, च अजिता, च अपराजिता देव्यः प्राक् क्रमेण स्वर्ण प्राकार द्वार भूमिषु स्थिताः. ॥ ५१ ॥ युग्मं ॥

अर्थः–अनुक्रमे सघळी अभय, पाश, दिव्य अंकुश, तथा मुद्गरने धारण करनारी, तथा चंद्र, कमल, सुवर्ण तथा अंजनसरखी

कांतिवाळी, ॥ ५० ॥ जया, विजया, अजिता अने अपराजिता नामनी देवीओ पूर्वदिशाना अनुक्रमथी सोनाना प्राकारनादरवाजानी भूमिओपर उभी हती. ॥ ५१ ॥ युग्मं ॥

**रौप्यवप्रे प्रतिद्वारं तुम्बरुर्द्वाःस्थतां दधौ । जटाकिरीटः खट्वाङ्गी नृशिरःस्रगलंकृतः ५२ ॥**

अन्वयः-रौप्य वप्रे प्रतिद्वारं जटा किरीटः, खट्वांगी, नृशिरः स्रगलंकृतः तुंबरुः द्वाःस्थतां दधौ. ॥ ५२ ॥

अर्थः-रूपाना प्राकारमां दरेक दरवाजे जटारूपी मुकुटवाळो, शूलना शस्त्रोवाळो, अने मनुष्योनां मस्तकोनी माळाथी शोभतो तुंबरुनामनो देव द्वारपालतरीके रह्यो हतो. ॥ ५२ ॥

**मध्ये समवसृत्याश्च व्यन्तराश्चैत्यपादपम् । व्यधुः श्रीद्वादशाधीशाङ्गद्वादशगुणोच्छ्रयम् ॥ ५३ ॥**

अन्वयः-च समवसृत्याः मध्ये व्यंतराः श्रीद्वादश अधीश अंग द्वादश गुण उच्छ्रयं चैत्य पादपं व्यधुः. ॥ ५३ ॥

अर्थः—वळी ते समवसरणनी वच्चे व्यंतरोए ते बारमा तीर्थंकरना शरीरथी बारगणुं उंचुं चैत्यवृक्ष बनाव्युं. ॥ ५३ ॥

**तदधो विदधुः पीठं नानामणिगणेन ते । यदंशुभिरशोकोऽभूत्केकिपत्रातपत्रवत् ॥ ५४ ॥**

अन्वयः—तत् अधः ते नाना मणि गणेन पीठं विदधुः, यत् अंशुभिः अशोकः केकिपत्र आतपत्रवत् अभूत्. ॥ ५४ ॥

अर्थः-तेनी नीचे तेओए विविध प्रकारना मणिओना समूहोवडे वेदिका करी, के जेना किरणोथी ते अशोकवृक्ष मयूरपक्षिना पींछांओनां छत्रनीपेठे शोभतुं हतुं. ॥ ५४ ॥

**तस्योपरि पराभूतसर्वामरविमानरुक् । छन्दकं मणिवृन्देन मन्दितार्केण तेऽसृजन् ॥ ५५ ॥**

अन्वयः—तस्य उपरि ते पराभूत सर्व अमर विमान रुक् मंदित अर्केण मणिवृन्देन छंदकं असृजन्. ॥ ५५ ॥

अर्थः—तेनी उपर तेओए सघळां देवविमानोनी कांतिने पराभव करनारो, सूर्यने पण निस्तेज करनारां मणिओना समूहवडे चंद्रवो बनाव्यो. ॥ ५५ ॥

**तन्मध्ये प्राङ्मुखं सांघ्रिपीठं सिंहासनं व्यधुः । रत्नैस्ते समवसृतिश्रियोऽस्या जीवितव्यवत् ॥ ५६ ॥**

अन्वयः–तत् मध्ये ते अस्याः समवसृति श्रियः जीवितव्यवत् रत्नैः प्राङ्मुखं स अंघ्रिपीठं सिंहासनं व्यधुः. ॥ ५६ ॥

अर्थः—तेमां वच्चे तेओए ते समवसरणनी लक्ष्मीना जीवनसरखुं रत्नोवडे पूर्वसन्मुख पादपीठसहीत सिंहासन बनाव्युं. ॥५६॥

**तेनुस्तदुपरि च्छत्रत्रयं ते चन्द्रसुन्दरम् । ज्ञानदर्शनचारित्रप्रभुताभावनं प्रभोः ॥ ५७ ॥**

अन्वयः–तत् उपरि ते प्रभोः ज्ञान दर्शन चारित्र प्रभुता भावनं चंद्र सुंदरं छत्र त्रयं तेनुः. ॥ ५७ ॥

अर्थः–ते सिंहासनपर तेओए प्रभुनां ज्ञान, दर्शन, अने चारित्रनी प्रभुता जणावनारां चंद्रसरखां मनोहर त्रण छत्रो विस्तार्यां.

**यक्षाभ्यां चामरौ तत्र दधाते स्वामिनो मुखम् । सेवितुं प्रहितौ चन्द्रद्वयेनांशुचयाविव ॥ ५८ ॥**

अन्वयः–तत्र स्वामिनः मुखं सेवितुं चंद्र द्वयेन अंशु चयौ प्रहितौ इव चामरौ यक्षाभ्यां दधाते. ॥ ५८ ॥

अर्थः—वळी त्यां प्रभुना मुखनी सेवा करवाने बन्ने चंद्रोए जाणे पोतानां किरणोना समूहो मोकली आप्यां होय नही! एवां बे

चामरोने बे यक्षो धारण करी रह्या हता. ॥ ५८ ॥

द्वारे समवसारस्य स्वर्णाब्जस्थमथाभवत् । श्रीधर्मचक्रितासूचि धर्मचक्रं प्रभाद्भुतम् ॥ ५९ ॥

अन्वयः—अथ समवसारस्य द्वारे श्रीधर्म चक्रिता सूचि, प्रभा अद्भुतं, स्वर्ण अब्ज स्थं धर्म चक्रं अभवत्. ॥ ५९ ॥

अर्थः—वळी ते समवसरणना दरवाजामां धर्मना चक्रिपणाने सूचवनारुं, अद्भुत कांतिवाळुं, तथा सुवर्णना कमलपर रहेलुं धर्मचक्र हतुं. ॥ ५९ ॥

कृत्यं यदन्यदप्यत्र दिव्यं तद्व्यंन्तरामराः । सर्वं वितेनिरे स्वामिभक्त्यजाततमश्रमाः ॥ ६० ॥

अन्वयः—अत्र यत् अन्यत् अपि दिव्यं कृत्यं, तत् सर्वं स्वामि भक्ति अजाततम श्रमाः व्यंतराः वितेनिरे. ॥ ६० ॥

अर्थः—वळी अहीं जे बीजुं पण दिव्य कार्य करवानुं हतुं, ते सघळुं प्रभुनी भक्तिथी नथी थयेल जरा पण श्रम जेओने, एवा ते व्यंतरोए बजाव्युं. ॥ ६० ॥

ततश्चतुर्विधामर्त्यकोटीनां कोटिभिर्वृतः । स्वामी समवसृत्यर्थं त्रैलोक्यकृपयाचलत् ॥ ६१ ॥

अन्वयः—ततः चतुर्विध अमर्त्य कोटीनां कोटिभिः वृतः स्वामी त्रैलोक्य कृपया समवसृत्यर्थं अचलत्. ॥ ६१ ॥

अर्थः—पछी चारे प्रकारना कोडाकोडी देवोथी वींटायेला ते प्रभु त्रणे लोकपरनी कृपाथी त्यां समोसरवामाटे चाल्या. ॥ ६१ ॥

नवतत्त्वश्रियामास्यानीव विश्वपतेः पुरः । सुरैः सुवर्णपद्मानि दिव्यान्यथ वितेनिरे ॥ ६२ ॥

अन्वयः–अथ नव तत्त्व श्रियां आस्यानि इव सुरैः विश्वपतेः पुरः दिव्यानि सुवर्ण पद्मानि वितेनिरे. ॥ ६२ ॥

अर्थः–पछी नव तत्वोनी लक्ष्मीओनां मुखसरखां देवोए ते प्रभुनी आगळ सुवर्णनां नव दिव्य कमलो विस्तार्यां. ॥ ६२ ॥

**द्वयोर्द्वयोः पदन्यासं तेषु चक्रे चलन्विभुः । अन्यानि चालयामास सुरवर्गः पुरः पुरः ॥ ६३ ॥**

अन्वयः–विभुः चलन् तेषु द्वयोः द्वयोः पद न्यासं चक्रे, अन्यानि सुरवर्गः पुरः पुरः चालयामास. ॥ ६३ ॥

अर्थः–पछी प्रभु चालताथका ते कमलोमाना बबेपर पगलां मूकवा लाग्या, अने (बाकीनां) बीजां कमलोने देवोनो समूह आगळ आगळ चलाववा लाग्यो. ॥ ६३ ॥

**ततः समवसृत्युर्वीं पूर्वद्वाराविशत्प्रभुः । द्यामिव द्युमणिर्विश्वतमःसमुदयच्छिदे ॥ ६४ ॥**

अन्वयः–ततः द्युमणिः विश्व तमः समुदय च्छिदे द्यां इव, प्रभुः पूर्व द्वारा समवसृति उर्वीं अविशत्. ॥ ६४ ॥

अर्थः–पछी जेम सूर्य जगतना अंधकारना समूहनो नाश करवामाटे आकाशमां प्रवेश करे, तेम प्रभुए पूर्वतरफना दरवाजेथी (जगतना अज्ञानरूपी अंधकारनो नाश करवामाटे) ते समवसरणनी भूमिपर प्रवेश कर्यो. ॥ ६४ ॥

**ततः प्रदक्षिणीकृत्य चैत्यद्रुं पूर्वदिङ्मुखः । तीर्थाय नम इत्युक्त्वा भेजे सिंहासनं जिनः ॥ ६५ ॥**

अन्वयः–ततः जिनः चैत्य द्रुं प्रदक्षिणीकृत्य, तीर्थाय नमः इति उक्त्वा पूर्व दिग् मुखः सिंहासनं भेजे. ॥ ६५ ॥

अर्थः–पछी ते प्रभु ते चैत्यवृक्षने प्रदक्षिणा देइने तीर्थप्रते नमस्कार थाओ ? एम कहीने पूर्व दिशातरफ मुख राखीने सिंहासनपर बेठा।

**रत्नसिंहासनस्थानि प्रतिरूपाण्यथ प्रभोः । अप्यन्यासु व्यधुस्त्रीणि व्यन्तरा दिक्षु तत्क्षणात् ॥ ६६ ॥**

अन्वयः—अथ व्यंतराः अन्यासु दिक्षु अपि तत्क्षणात् रत्न सिंहासन स्थानि प्रभोः त्रीणि प्रतिरूपाणि व्यधुः. ॥ ६६ ॥

अर्थः—पछी व्यंतरोए त्रीजी त्रणे दिशाओमां पण तेज क्षणे रत्नोना सिंहासनोपर बेठेलां प्रभुनां (बीजां) त्रण प्रतिरूपो कर्यां.

**अङ्गुष्ठस्यापि नो रूपं ते विकर्तुं प्रभोः क्षमाः । प्रभुप्रभावादेवासीत्तद्रूपं तासु मूर्तिषु ॥ ६७ ॥**

अन्वयः—ते प्रभोः अंगुष्ठस्य अपि रूपं विकर्तुं क्षमाः नो, तासु मूर्तिषु प्रभु प्रभावात् एव तत् रूपं आसीत्. ॥ ६७ ॥

अर्थः—ते व्यंतरो तो प्रभुना फक्त अंगुठानुं रूप पण विकुर्ववाने समर्थ न्होता, परंतु ते प्रतिरूपोमां प्रभुना महिमाथीज तेवुं स्वरूप थयुं हतुं. ॥ ६७ ॥

**सर्वद्वीपार्कतेजांसि पिण्डयित्वेव निर्मितम् । उद्भास्वदुद्बभूवानुमौलि भामण्डलं विभोः ॥ ६८**

अन्वयः—सर्व द्वीप अर्क तेजांसि पिंडयित्वा निर्मितं इव, विभोः अनुमौलि उद्भास्वत् भामंडलं उद्बभूव. ॥ ६८ ॥

अर्थः—सर्व द्वीपोना सूर्योनां तेजने एकठुं करीने जाणे बनाव्युं होय नही! तेम प्रभुना मस्तकनी आसपास अतितेजस्वी भामंडल प्रगट थयुं हतुं. ॥ ६८ ॥

**जिनेशदेशनानादनासीरो विश्वपापभित् । पूरयन्मरुदध्वानमुच्चैर्दध्वान दुन्दुभिः ॥ ६९ ॥**

अन्वयः—जिनेश देशना नाद नासीरः, विश्व पाप भित् दुंदुभिः मरुत् अध्वानं पूरयन् उच्चैः दध्वान. ॥ ६९ ॥

अर्थः—जिनेश्वर प्रभुनी देशनाना स्वरने अनुसरनारी, तथा जगतना पापोने भेदनारी दुंदुभि आकाशने पूरतीथकी म्होटेथी वागवा लागी. ॥ ६९ ॥

**रत्नध्वजः पुरो भर्तुरुद्बभूव यदग्रतः । नृत्यन्पताकाहस्तेन धर्मः शैलूषतां दधौ ॥ ७० ॥**

अन्वयः–भर्तुः पुरः रत्न ध्वजः उद्बभूव, यत् अग्रतः पताका हस्तेन नृत्यन् धर्मः शैलूषतां दधौ. ॥ ७० ॥

अर्थः—( त्यां ) प्रभुनी आगळ रत्नोनो ध्वजदंड उभो हतो, के जेनीपासे पताकारूपी हाथथी नाचतो धर्म जाणे नटपणाने धारण करतो हतो. ॥ ७० ॥

**प्राग्द्वारागत्य वप्रेऽस्मिन्दत्वा तिस्रः प्रदक्षिणाः । नत्वा तीर्थं जिनं चाग्निदिश्याचारविदो मुदा ॥ ७१ ॥**

**स्थानं विमुच्य साधूनां साध्वीनां च तदन्तरे । विहिताञ्जलयस्तस्थुरूर्ध्वा वैमानिकस्त्रियः ॥७२॥ युग्मं॥**

अन्वयः—अस्मिन् वप्रे प्राग् द्वारा आगत्य, तिस्रः प्रदक्षिणाः दत्वा, तीर्थं च जिनं नत्वा अग्निदिशि मुदा आचार विदः, ॥ ७१ ॥ वैमानिक स्त्रियः साधूनां च साध्वीनां स्थानं विमुच्य, तदंतरे विहित अंजलयः ऊर्ध्वाः तस्थुः. ॥ ७२ ॥ युग्मं ॥

अर्थः–आ गढमां पूर्वना दरवाजेथी आवीने, त्रण प्रदक्षिणा दइने, तथा तीर्थ अने प्रभुने नमीने, अग्निखूणामां हर्षथी, आचारने जाणनारी, ॥ ७१ ॥ वैमानिक देवोनी देवीओ, साधुओ तथा साध्वीओनी जगा छोडीने , तेनी वच्चेना भागमां हाथ जोडीने उभी गइ. ॥ ७२ ॥ युग्मं ॥

**याम्यद्वारा प्रविश्याथ विधिना नैर्ऋते स्थिताः । क्रमेण भवनाधीशज्योतिष्कव्यन्तरस्त्रियः ॥ ७३ ॥**

अन्वयः–अथ याम्यद्वारा विधिना प्रविश्य नैऋते क्रमेण भवन अधीश ज्योतिष्क व्यंतर स्त्रियः स्थिताः. ॥ ७३ ॥

अर्थः–पछी दक्षिणबाजुना दरवाजेथी विधिपूर्वक प्रवेश करीने नैऋत्य दिशामां अनुक्रमे भवनपति, ज्योतिष्क तथा व्यंतरनी देवीओ बेठी. ॥ ७३ ॥

**प्रतीच्या गोपुरेणाथ प्रविश्यास्थुर्मरुद्दिशि । विधिना भवनाधीशज्योतिष्कव्यन्तरास्तथा ॥ ७४ ॥**

अन्वयः–अथ प्रतीचा गोपुरेण प्रविश्य मरुत् दिशि भवन अधीश व्यंतराः तथा विधिना अस्थुः. ॥ ७४ ॥

अर्थः–पछी पश्चिम तरफना दरवाजेथी प्रवेश करीने वायव्यदिशामां भवनपतिओ तथा व्यंतरो तेवीजरीते विधिपूर्वक बेसी गया. ॥ ७४ ॥

**गोपुरेणोत्तरेणोच्चैः प्रविष्टास्तद्विधिक्रमात् । कल्पामरा नरा नार्य ईशाने ककुभि स्थिताः ॥ ७५ ॥**

अन्वयः–उच्चैः उत्तरेण गोपुरेण विधिक्रमात् तत् प्रविष्टाः कल्प अमराः, नराः, नार्यः ईशाने ककुभि स्थिताः. ॥ ७५ ॥

अर्थः–पछी उत्तर तरफना उंचा दरवाजेथी विधिपूर्वक अनुक्रमे त्यां दाखल थयेला कल्पना देवो, पुरुषो तथा स्त्रीओ ईशान दिशामां बेठा. ॥ ७५ ॥

**अल्पर्द्धिः प्रथमायातस्तत्रायान्तं महर्द्धिकम् । प्रणनामागतं त्वग्रे नमन्नेव ययौ च सः ॥ ७६ ॥**

अन्वयः—प्रथम आयातः अल्पऋद्धिः तत्र आयातं महर्द्धिकं प्रणनाम, च अग्रे आगतं तु सः नमन् एव ययौ. ॥ ७६ ॥

अर्थः—प्रथम आवेलो स्वल्प ऋद्धिवाळो देव त्यां आवेला महान् ऋद्धिवाळा देवने नमतो हतो, अने आगळथी आवेला महर्द्धिक देवने तो ते नमीनेज जतो हतो. ॥ ७६ ॥

**नासीन्नियन्त्रणा तत्र न च काचन दुःकथा । न भयं न च मात्सर्यमभून्मत्सरिणामपि ॥ ७७ ॥**

अन्वयः—तत्र नियंत्रणा न आसीत्, च काचन दुःकथा न, भयं न, च मत्सरिणां अपि मात्सर्यं न अभूत्. ॥ ७७ ॥

अर्थः—त्यां कोइ जातनुं बंधन न्होतुं, तेमज कोइ प्रकारनी दुष्ट कुथली न्होती, भय न्होतो, अने मत्सरीओवच्चे पण कोइ जातनो वैरभाव न्होतो. ॥ ७७ ॥

**द्वितीयस्य तु वप्रस्य मध्ये सिंहगजादयः । तिर्यञ्चोऽस्थुर्मिथः स्पर्शसुखस्थास्त्यक्तमत्सराः ॥ ७८ ॥**

अन्वयः—द्वितीयस्य वप्रस्य तु मध्ये मिथः स्पर्श सुखस्थाः, त्यक्त मत्सराः सिंह गज आदयः तिर्यंचः अस्थुः. ॥ ७८ ॥

अर्थः—वळी बीजा प्राकारनी अंदर परस्पर सुखे स्पर्श करीने रहेला सिंह तथा हाथीआदिक तिर्यंचो वैर तजीने रह्या. ॥ ७८ ॥

**संघट्टादप्यभग्नानि रौप्यवप्रान्तरे पुनः । सुरासुरनरेशानां वाहनान्यवतस्थिरे ॥ ७९ ॥**

अन्वयः—पुनः रौप्य वप्र अंतरे संघट्टात् अपि अभग्नानि, सुर असुर नर ईशानां वाहनानि अवतस्थिरे. ॥ ७९ ॥

अर्थः—वळी रूपाना प्राकारमां परस्पर अथडावाथी पण नही भांगतां एवां देवो, दानवो, तथा राजाओनां वाहनो रह्यां हतां.

दिशञ्शोभां पुरे राजा जयापद्मावतीवृतः । तत्रागतयोत्सवैर्नाथं नत्वास्थाद्विधिवत्तदा ॥ ८० ॥

अन्वयः–तदा जया पद्मावती वृतः राजा पुरे शोभां दिशन् तत्र उत्सवैः आगत्य, नाथं नत्वा विधिवत् अस्थात्. ॥ ८० ॥

अर्थः—ते वखते जया अने पद्मावतीथी युक्त थयेला वसुपूज्यराजा नगरमां शोभा करताथका त्यां महोत्सवपूर्वक आवीने, तथा प्रभुने नमीने विधिपूर्वक बेठा. ॥ ८० ॥

स्वपुत्रैश्वर्यमालोक्य त्रिलोक्या स्तूयमानयोः । यः पित्रोः प्रमदो जज्ञे तत्पुरश्चुलुकोऽम्बुधिः ॥ ८१ ॥

अन्वयः–त्रैलोक्या स्तूयमानयोः पित्रोः, स्व पुत्र ऐश्वर्यं आलोक्य यः प्रमदः जज्ञे, तत्पुरः अंबुधिः चुलुकः. ॥ ८१ ॥

अर्थः—त्रणे लोकथी स्तुति कराता एवा मातपिताने पोताना पुत्रनी समृद्धि जोइने जे हर्ष थयो, तेनी आगळ महासागर पण अंजलिसमान थयो. ॥ ८१ ॥

ये योजनसहस्रेऽपि जीवा मान्त न मान्ति वा । ममुः प्रभुप्रभावात्ते पीठे तत्रैकयोजने ॥ ८२ ॥

अन्वयः–योजन सहस्रे अपि ये जीवाः मांति वा न मांति, ते प्रभु प्रभावात् तत्र एक योजने पीठे ममुः. ॥ ८२ ॥

अर्थः–एक हजार जोजन जेटली जमीनमां पण जेटलां प्राणीओ माइ शके, अथवा न माइ शके, तेटलां प्राणीओ प्रभुना माहात्म्यथी ते एक जोजनजेवडां समवसरणमां समाइ गयां. ॥ ८२ ॥

निवार्य भक्तिवर्योऽथ सर्वं कोलाहलं तदा । नत्वा तीर्थपतिं स्तोतुमिति शक्रः प्रचक्रमे ॥ ८३ ॥

अन्वयः-अथ तदा भक्ति वर्यः शक्रः सर्वं कोलाहलं निवार्य तीर्थपतिं इति स्तोतुं प्रचक्रमे. ॥ ८३ ॥

अर्थः—पछी ते वखते उत्तम भक्तिवाळो इंद्र सघळो कोलाहल अटकावीने प्रभुनी आवी रीते स्तुति करवा लाग्यो. ॥ ८३ ॥

श्रीवासुपूज्य नन्दन्तु त्वदंह्रिनखचन्द्रिकाः । दशाशाविलसज्जन्तुकर्मसंतमसच्छिदः ॥ ८४ ॥

अन्वयः-(हे) श्रीवासुपूज्य ! दश आशा विलसत् जंतु कर्म संतमसच्छिदः त्वत् अंह्रि नख चंद्रिकाः नंदतु. ॥ ८४ ॥

अर्थः-हे श्रीवासुपूज्य प्रभु ! दशे दिशाओमां वसता प्राणीओना अज्ञानरूपी अंधकारनो नाश करनारी आपना चरणोना नखोरूपी चांदनीओ समृद्धि पामो ? ॥ ८४ ॥

नमः शमसुधाम्भोधिलहरीभ्य इव प्रभो । त्वद्विलोकितलीलाभ्यो भवाग्निभ्रंशहेतवे ॥ ८५ ॥

अन्वयः-(हे) प्रभो ! भव अग्नि भ्रंश हेतवे शम सुधा अंभोधि लहरीभ्यः इव, त्वत् विलोकित लीलाभ्यः नमः ॥ ८५ ॥

अर्थः-हे प्रभु ! आ संसाररूपी अग्निनो नाश करवामाटे शांतिरूपी अमृतसागरना मोजांओसरखी आपनी दृष्टिनी लीलाप्रते नमस्कार थाओ ? ॥ ८५ ॥

अन्तःसंततसंदीप्तध्यानानलविभानिभाः । विभो तव विभान्त्यङ्गभासो दासितविद्रुमाः ॥ ८६ ॥

अन्वयः-(हे) विभो! अंतः संतत संदीप्त ध्यान अनल विभा निभाः, दासित विद्रुमाः, तव अंगभासः विभांति. ॥ ८६ ॥

अर्थः—(हे) प्रभु! हृदयमां हमेशां प्रदीप्त थयेला ध्यानरूपी अग्निनी कांतिसरखी, अने परवालांओने पण दासरूप करनारी आपना शरीरनी कांति शोभी रहेली छे. ॥ ८६ ॥

**जयन्ति दन्तद्युतयो विश्वेश विशदास्तव । भवार्णवतरण्डस्य सितध्वजपटोपमाः ॥ ८७ ॥**

अन्वयः-(हे) विश्वेश! भव अर्णव तरंडस्य तव दंतद्युतयः सितध्वज पद उपमाः विशदाः जयंति. ॥ ८७ ॥

अर्थः-हे जगत्प्रभु! संसाररूपी महासागरने (तरवाने) नावसमान एवा आपना दांतोनी कांति (ते नावपरना) श्वेतसढना वस्त्रसरखी निर्मल जयवंती वर्ती रही छे. ॥ ८७ ॥

**भाग्यं भुवि भवानेव विभाति भविनां विभो । यद्भवद्दर्शनं तेषां सर्वेन्द्रियमदप्रदम् ॥ ८८ ॥**

अन्वयः-(हे) विभो! भुवि भवान् एव भविनां भाग्यं विभाति, यत् भवत् दर्शनं तेषां सर्व इंद्रिय मद प्रदं. ॥ ८८ ॥

अर्थः—हे प्रभो! पृथ्वीपर आपज भव्य लोकोना (उत्तम) भाग्य समान शोभी रह्या छो, केमके आपनुं दर्शन तेओनी सर्व इंद्रियोने आनंद आपनारुं छे. ॥ ८८ ॥

**स्तूयसे सुमनोभिस्त्वममनस्कोऽपि यत्प्रभो । केवलस्यैव पुण्यस्य तन्महत्त्वमहो तव ॥ ८९ ॥**

अन्वयः—(हे) प्रभो! अमनस्कः अपि त्वं यत् सुमनोभिः स्तूयसे, तत् अहो! तव केवलस्य पुण्यस्य एव महत्त्वं. ॥ ८९ ॥

अर्थः–हे प्रभु! अहो! मनरहित एवा पण आप जे उत्तम मनवाळाओथी (देवोथी) स्तुति कराओ छो, तेनो हेतु फक्त आपना पुण्यपुंज माहात्म्य छे. ॥ ८९ ॥

**धर्मदेशनया वीतरागयिष्यञ्जनं जिन । प्रागेव कुरुषे वीतरागं दन्तद्युताधरम् ॥ ९० ॥**

अन्वयः–(हे) जिन! धर्मदेशनया जनं वीतरागयिष्यन् प्राक् एव दंतद्युता अधरं वीतरागं कुरुषे. ॥ ९० ॥

अर्थः–हे प्रभु! धर्मदेशनावडे लोकोने (आप) रागरहित करवाना होवाथी, प्रथमथीज (आपनी) दांतोनी कांतिवडे होठने रागरहित करो छो. ॥ ९० ॥

**वर्धमानवरज्ञानज्ञेयः श्रेयःश्रियः पदम् । त्वत्प्रसादः सदा मेऽस्तु वासुपूज्य जिनाधिप ॥ ९१ ॥**

अन्वयः–(हे) वासुपूज्य जिनाधिप! वर्धमान वर ज्ञान ज्ञेयः, श्रेयः श्रियः पदं, त्वत् प्रसादः सदा मे अस्तु. ॥ ९१ ॥

अर्थः–हे वासुपूज्य प्रभु! वृद्धि पामता उत्तम ज्ञानथी जाणवालायक, तथा कल्याणकारी लक्ष्मीना स्थानरूप, एवी आपनी कृपा हमेशां मारापर रहो? ॥ ९१ ॥

**इतीन्द्रस्तुतिभिस्तुष्टे निविष्टे नृसुरासुरे । निर्मलां निर्ममे धर्मदेशनां निर्ममेश्वरः ॥ ९२ ॥**

अन्वयः—इति इंद्र स्तुतिभिः तुष्टे नृ सुर असुरे निविष्टे निर्मम ईश्वरः निर्मलां धर्म देशनां निर्ममे. ॥ ९२ ॥

अर्थः—एरीते इंद्रनी स्तुतिओथी खुशी थयेला मनुष्यो, देवो तथा दानवो बेसी गयाबाद त्यागीओमां अग्रेसर एवा ते श्रीवासुपूज्यप्रभु धर्मदेशना देवा लाग्या. ॥ ९२ ॥

**योजनप्रसराः सर्वभाषापरिणतिप्रियाः । पञ्चत्रिंशद्गुणा रेजुर्गिरो विश्वगुरोरिति ॥ ९३ ॥**

अन्वयः-योजन प्रसराः, सर्व भाषा परिणति प्रियाः, पंच त्रिंशद् गुणाः विश्वगुरोः इति गिरः रेजुः. ॥ ९३ ॥

अर्थः—एक जोजनसुधी फेलावो पामती, सर्व भाषाओना परिणामथी (सर्वने) प्रिय लागती, अने पांत्रीस गुणोवाळी, प्रभुनी वाणी नीचे मुजब शोभवा लागी. ॥ ९३ ॥

**भो भव्या भूरिभाग्येन भविनां नृभवो भवेत् । तदमुं प्राप्य संसारं त्यक्त्वा श्रयत निर्वृतिम् ॥ ९४ ॥**

अन्वयः-भोः भव्याः! भविनां भूरि भाग्येन नृभवः भवेत्, तत् अमुं प्राप्य, संसारं त्यक्त्वा निर्वृतिं श्रयत? ॥ ९४ ॥

अर्थः—हे! भव्यलोको! संसारी जीवोने घणा भाग्योना योगे (आ) मनुष्यभव प्राप्त थाय छे, माटे ते मनुष्यजन्म पामीने, संसारनो त्याग करी तमो मुक्तिनो आश्रय करो? ॥ ९४ ॥

**यतः संसारमस्तोकशोकदुःखभृतं बुधाः । न भजन्ते यथाश्वत्थतरोः कृम्याकुलं फलम् ॥ ९५ ॥**

अन्वयः—यतः यथा बुधाः अश्वत्थ तरोः कृमि आकुलं फलं न भजंते (तथा) अस्तोक शोक दुःख भृतं संसारं (न) ॥ ९५ ॥

अर्थः—केमके जेम डाह्या माणसो पीपळाना वृक्षना जंतुओथी भरेलां फलने सेवता (खाता) नथी, तेम (तेओ) अति शोक अने दुःखथी भरेला आ संसारने पण सेवता नथी. ॥ ९५ ॥

**मोक्षायाभ्युद्यतैर्भाव्यं भव्यैः शाश्वतशर्मणे । भवदुःखानि यन्नूनं न भवेयुः शुभात्मनाम् ॥ ९६ ॥**

अन्वयः-भव्यैः शाश्वत शर्मणे मोक्षाय उद्यतैः भाव्यं, यत् नूनं शुभ आत्मनां भव दुःखानि न भवेयुः. ॥ ९६ ॥

अर्थः—भव्यलोकोए शाश्वतुं सुख आपनारां मोक्षमाटे उद्यम करवो, के जेथी ते शुभात्माओने संसारसंबंधि दुःखो थाय नही. ९६

**शक्तिज्ञानदृगानन्दा यत्रानन्ता ध्रुवं स्थिताः । कः संसारसुखभ्रान्त्या तत्र मोक्षे निरुद्यमः ॥ ९७ ॥**

अन्वयः—यत्र अनंताः शक्ति ज्ञान दृग् आनंदाः ध्रुवं स्थिताः, तत्र मोक्षे संसारसुख भ्रांत्या निरुद्यमः कः? ॥ ९७ ॥

अर्थः-जे मोक्षमां अनंत शक्ति, ज्ञानवडे निरीक्षण तथा आनंद शाश्वतां रहेलां छे, ते मोक्ष (मेळववामाटे) संसारिक सुखोनी भ्रमणाथी निरुद्यमी कोण रहे? ॥ ९७ ॥

**यः संसारसुखास्वादान्मोक्षसौख्ये निरादरः । व्यग्रः पङ्कादने दुर्धीः स सुधीमवधीरयेत् ॥ ९८ ॥**

अन्वयः-संसार सुख आस्वादात् मोक्ष सौख्ये यः निरादरः, सः दुर्धीः पंक अदने व्यग्रः सुधां अवधीरयेत्. ॥ ९८ ॥

अर्थः—संसारिक सुखना स्वादथी मोक्षसुखमाटे जे माणस निरादर रहे छे, ते दुर्बुद्धि माणस कादवना भक्षणमां लालचु थइने अमृतनो तिरस्कार करे छे. ॥ ९८ ॥

**संसारे परमं दुःखं मोक्षे च परमं सुखम् । इति तत्त्वं परिज्ञाय भाव्यं मोक्षाय तत्परैः ॥ ९९ ॥**

अन्वयः-संसारे परमं दुःखं, च मोक्षे परमं सुखं, इति तत्त्वं परिज्ञाय मोक्षाय तत्परैः भाव्यं. ॥ ९९ ॥

अर्थः-संसारमां घणुं दुःख छे, अने मोक्षमां अनंतुं सुख छे, एवुं सत्य स्वरूप जाणीने (तमारे) मोक्ष सुख मेळववामाटे तत्पर थवुं.

**तस्याद्यं कारणं धर्मस्तरोर्बीजमिव ध्रुवम् । यतितव्यं ततस्तस्मिन्नप्रमत्तैर्मनीषिभिः ॥ १००० ॥**

अन्वयः-तरोः बीजं इव, तस्य आद्यं कारणं ध्रुवं धर्मः, ततः मनीषिभिः तस्मिन् अप्रमत्तैः यतितव्यं. ॥ १००० ॥

अर्थः—वृक्षना बीजनीपेठे ते मोक्षनुं पेहेलुं कारण खरेखर धर्म छे, माटे बुद्धिवानोए ते धर्म करवामां प्रमाद रहित थइने प्रयत्न करवो. ॥ १००० ॥

**अयं धर्मो द्विधा ज्ञेयः साधुश्राद्धाश्रयाद् बुधैः । अल्पानल्पविलम्बेन सिद्ध्ये द्विविधोऽपि सः ॥ १ ॥**

अन्वयः-अयं धर्मः साधु श्राद्ध आश्रयात् बुधैः द्विधा ज्ञेयः, सः द्विविधः अपि अल्प अनल्प विलंबेन सिद्ध्ये. ॥ १ ॥

अर्थः-आ धर्म साधु अने श्रावकोने अपेक्षीने विद्वानोए बे प्रकारनो जाणवो, अने ते बन्ने प्रकारनो धर्म, (अनुक्रमे) स्वल्प काले अने लांबे काले मोक्षसुख (आपनारो थाय छे.) ॥ १ ॥

**तत्र सावद्ययोगानां विरतिः सर्वतः सदा । निर्दोष एव साधूनां धर्मश्चारित्रलक्षणः ॥ २ ॥**

अन्वयः—तत्र साधूनां चारित्र लक्षणः धर्मः निर्दोषः एव, सदा सर्वतः सावद्य योगानां विरतिः. ॥ २ ॥

अर्थः—तेमां साधुओनो चारित्ररूप धर्म दूषणरहितज छे, (केमके) ते धर्ममां हमेशां सर्व प्रकारे पापकार्योथी विरमवानुं छे. ।२।

**यदि सावद्ययोगानां देशतो विरतिर्भवेत् । तदेष गृहिणां धर्मः श्रमणोपास्तिसंस्पृशाम् ॥ ३ ॥**

अन्वयः—यदि सावद्य योगानां देशतः विरतिः भवेत्, तत् एषः श्रमण उपास्ति संस्पृशां गृहिणां धर्मः. ॥ ३ ॥

अर्थः—ज्यारे पापयुक्त कार्योनी देशथी (विभागरूपे) विरति थाय, त्यारे तेने आ साधुओनी सेवा करनारा गृहस्थीओनो (श्रावकोनो) धर्म (जाणवो.) ॥ ३ ॥

**द्विविधोऽपि विधेयोऽयं श्रद्धया शुद्धयाधिकम् । सा पुनः सुगुरोस्तत्त्वोपदेशैर्जायते श्रुतैः ॥ ४ ॥**

अन्वयः—द्विविधः अपि अयं शुद्धया श्रद्धया अधिकं विधेयः, पुनः सा श्रुतैः सुगुरोः तत्त्व उपदेशैः जायते. ॥ ४ ॥

अर्थः—ते बन्ने प्रकारनो आ धर्म निर्मल श्रद्धाथी अधिक अधिक करवो, अने ते श्रद्धा सुगुरुपासे सांभळेला तत्त्वज्ञानना उपदेशथी थाय छे. ॥ ४ ॥

**तेऽप्यास्तिकत्वपात्रेषु फलन्त्यन्यत्र न क्वचित् । नानाचित्तेष्वहो शुद्धमत्यादिष्विव तद्यथा ॥ ५ ॥**

अन्वयः—अहो! ते अपि शुद्धमति आदिषु इव, नाना चित्तेषु आस्तिकत्व पात्रेषु फलंति, अन्यत्र क्वचित् न, तत् यथा ॥५॥

अर्थः—अहो! ते उपदेशो पण शुद्धबुद्धि आदिकनीपेठे विविध प्रकारनां हृदयवाळा, आस्तिकपणाना भाजनरूप पात्रोमांज फलदायक थाय छे, ते शिवाय बीजा कोइने पण ते फलदायक थतो नथी, ते शुद्धबुद्धि आदिकनां दृष्टांतो नीचे मुजब छे. ॥ ५ ॥

अनन्तजनमित्यस्ति पुरं महिमवत्तरम् । शश्वद्वसन्ति यत्पौरैरेव विश्वपुराण्यपि ॥ ६ ॥

अन्वयः-महिमवत्तरं अनंतजनं इति पुरं अस्ति, यत् पौरैः एव विश्वपुराणि अपि शश्वत् वसंति. ॥ ६ ॥

अर्थः—अतिमाहात्म्यवाळुं अनंतजननामनुं नगर छे, के जे नगरना नागरिकोवडेज जगतना सघळां शेहेरो पण हमेशां (अनादि-काळथी) वसेलां छे. ॥ ६ ॥

महाकष्टमसाधूनां साधूनां संमदं ददत् । तत्र चित्रगतिर्नाम धरित्रीदयितः स्थितः ॥ ७ ॥

अन्वयः—तत्र असाधूनां महाकष्टं, साधूनां संमदं ददत् चित्रगतिः नाम धरित्री दयितः स्थितः. ॥ ७ ॥

अर्थः-त्यां दुर्जनोने महान् कष्ट आपनारो, अने सज्जनोने आनंद आपनारो चित्रगतिनामनो राजा रहेलो छे. ॥ ७ ॥

पुरेऽत्र कष्टं तिष्ठंन्तः क्वापि सौख्याय गम्यताम् (गच्छत) । इत्युक्तास्तेन चत्वारः पौरा निरगुरेकदा ८

अन्वयः—अत्र पुरे कष्टं तिष्ठंतः चत्वारः पौराः "सौख्याय क्व अपि गम्यतां" इति एकदा तेन उक्ताः निरगुः. ॥ ८ ॥

अर्थः—ते नगरमां दुःखे रहेता एवा चार नागरिकोने "तमो सुख मेळववामाटे क्यांक जाओ? एम एक दिवसे ते राजाए कहेवाथी, तेओ त्यांथी निकळी गया. ॥ ८ ॥

ते तु शुद्धमतिर्योग्यमतिर्मन्दमतिस्तथा । दुर्मतिश्चेति कुग्रामेष्वजीवन्कर्मवृत्तितः ॥ ९ ॥

अन्वयः—शुद्धमतिः, योग्यमतिः, मंदमतिः, तथा दुर्मतिः च, इति ते तु कुग्रामेषु कर्म वृत्तितः अजीवन्. ॥ ९ ॥

अर्थः—शुद्धमति, योग्यमति, मंदमति अने दुर्मति नामना ते चारे नागरिको कोइक न्हाना गांमडांओमां जइ मजूरी करीने (पोतपोतानी) आजीविका चलाववा लाग्या. ॥ ९ ॥

**कामं वृत्त्यै भ्रमन्तस्ते शीतवातातपेष्वपि । रत्नद्वीपं ययुः कष्टार्जिताल्पद्रव्यशम्बलाः ॥ १० ॥**

अन्वयः—शीत वात आतपेषु अपि कामं वृत्त्यै भ्रमंतः ते कष्ट अर्जित द्रव्य शंबलाः रत्न द्वीपं ययुः. ॥ १० ॥

अर्थः—ठंडी, वायु तथा तडकामां पण अति मेहेनतथी आजीविकामाटे भमता एवा तेओ केटलीक मुश्केलीए मेळवेलुं (थोडुं घणुं) द्रव्य साथे लेइने रत्नद्वीपमां गया. ॥ १० ॥

**कुशैलेषु दृषत्खण्डान्सत्रासानल्पतेजसः । रत्नभ्रमेण गृह्णन्तो मूढा मुमुदिरेऽत्र ते ॥ ११ ॥**

अन्वयः—अत्र ते मूढाः कुशैलेषु सत्रासान्, अल्प तेजसः दृषत् खंडान् रत्न भ्रमेण गृह्णंतः मुमुदिरे. ॥ ११ ॥

अर्थः—अहीं ते मूर्खाओ नकामा पहाडोमां पडेला पासादार, तथा स्वल्प तेजवाळा पत्थरोना टुकडाओने (पांचीकाओने) रत्नोनी भ्रांतिथी लेइने खुशी थवा लाग्या. ॥ ११ ॥

**तैरलोकि पुमान्कोऽपि दिव्याभरणभासुरः । तरुच्छायास्थितः सारपरिवारो महानिह ॥ १२ ॥**

अन्वयः—इह तैः दिव्य आभरण भासुरः, सार परिवारः, कः अपि महान् पुमान् तरु च्छाया स्थितः अलोकि. ॥ १२ ॥

अर्थः—पछी त्यां तेओए दिव्य आभूषणोथी शोभता, अने उत्तम परिवारवाळा कोइक महान पुरुषने वृक्षनी छायामां बेठेलो जोयो.

**प्रीणितस्वान्तया नुन्नः कान्तयाथ प्रशान्तया । असत्योक्तिनिशाभानुस्तानुवाच पुमानयम् ॥ १३ ॥**

अन्वयः—अथ प्रीणित स्वांतया प्रशांतया कांतया नुन्नः असत्य उक्ति निशा भानुः अयं पुमान् तान् उवाच. ॥ १३ ॥

अर्थः—पछी खुशी थयेलां हृदयवाळी शांतिनामनी स्त्रीथी प्रेरायेला, तथा असत्य वचनरूपी रात्रिनो विनाश करवामां सूर्यसरखा ते पुरुषे तेओने कह्युं के, ॥ १३ ॥

**किमेभिरश्मखण्डैर्वो रोचितैः पामरोचितैः । न स्पृशन्ति करेणापि यानि पौराः परीक्षकाः ॥ १४ ॥**

अन्वयः—वः रोचितैः पामर उचितैः एभिः अश्मखंडैः किं? यानि परीक्षकाः पौराः करेण अपि न स्पृशंति. ॥ १४ ॥

अर्थः—तमोने गमेलां, पामरोने लेवायोग्य आ पांचीकाओथी शुं (लाभ थवानो छे?) के जेने परीक्षक नागरीको हाथ पण अडकाडता नथी. ॥ १४ ॥

**इतोऽग्रतोऽस्ति माणिक्यगिरिर्गुरुगुणालयः । यत्प्रभासु न भासन्ते तमांसि च महांसि च ॥ १५ ॥**

अन्वयः—इतः अग्रतः गुरु गुण आलयः माणिक्य गिरिः अस्ति, यत् प्रभासु तमांसि च महांसि च न भासंते. ॥ १५ ॥

अर्थः—अहींथी आगळ महान् गुणोना स्थानरूप माणिक्यगिरि नामनो पर्वत छे, के जेना तेज आगळ अंधकार अने (सूर्यनो) प्रकाश पण देखाता नथी. ॥ १५ ॥

यदि तं याथ रत्नानि लभध्वे तानि तानि तत् । येषां महीयोमहसां महीयं मूल्यमल्पकम् ॥ १६ ॥

अन्वयः–यदि तं याथ, तत् तानि तानि रत्नानि लभध्वे, महीयः महसां येषां महीयं मूल्यं अल्पकं. ॥ १६ ॥

अर्थः–जो तमो त्यां जाओ, तो तमोने एवां एवां (अमूल्य) रत्नो मळे, के महान तेजवाळां एवां तेओनुं जेटलुं महान् मूल्य कहीयें तेटलुं थोडुं छे. ॥ १६ ॥

अथ शुद्धमतिर्दध्यौ साधु दिष्टमनेन मे । व्यक्तं परोपकारार्थमेव जीवितमीदृशाम् ॥ १७ ॥

अन्वयः–अथ शुद्धमतिः दध्यौ, अनेन मे साधु दिष्टं, ईदृशां जीवितं व्यक्तं पर उपकार अर्थं एव. ॥ १७ ॥

अर्थः–( ते सांभळी ) शुद्धमतिए विचार्युं के, आ माणसे मने साचुं कह्युं छे, केमके एवा माणसोनुं जीवन प्रगटपणे परोपकार-माटेज होय छे. ॥ १७ ॥

तदस्यादेशमाधाय दारिद्र्याय ददे जलम् । इति ध्यात्वा चचालासौ माणिक्याचलदिङ्मुखः ॥ १८ ॥

अन्वयः—तत् अस्य आदेशं आधाय दारिद्र्याय जलं ददे, इति ध्यात्वा माणिक्य अचल दिङ्मुखः असौ चचाल. ॥ १८ ॥

अर्थः–(पछी) आ पुरुषनी आज्ञा मानीने हुं मारां दारिद्र्यने जलांजलि आपुं, एम विचारीने ते माणिक्यपर्वतनी दिशातरफ चालवा लाग्यो. ॥ १८ ॥

तस्मै रत्नार्थिने खानिखननार्थमथार्पयत् । पुमान्स दिव्यः कुद्दालं तीव्रत्वालंकृतं कृती ॥ १९ ॥

अन्वयः—अथ सः कृती दिव्यः पुमान् रत्न अर्थिने तस्मै खानि खननार्थं तीव्रत्व अलंकृतं कुद्दालं अर्पयत्. ॥ १९ ॥

अर्थः-पछी ते कृतज्ञ दिव्य पुरुषे रत्नो मेळववानी इच्छावाळा एवा ते शुद्धमतिने (त्यां ते रत्नोनी) खाण खोदवामाटे सजेली धारथी शोभिती कोदाळी आपी. ॥ १९ ॥

**माणिक्याचलमासाद्य माद्यद्रोमाञ्चकञ्चुकः । अवापैष खनन्खानी रत्नानीह त्विषां गृहम् ॥ २० ॥**

अन्वयः—एषः माणिक्य अचलं आसाद्य माद्यत् रोमांचकंचुकः खानीः खनन् इह त्विषां गृहं रत्नानि अवाप. ॥ २० ॥

अर्थः-(त्यां) ते रोहणाचलपासे जइ, हर्षथी रोमांचित थइ खाण खोदवा लाग्यो, अने त्यांथी तेजनां स्थानसरखां रत्नो तेने मळ्यां.

**कालेनाप्यतिकष्टेनाप्यहं रत्नममूल्यकम् । तद् ग्रहीष्येऽधुना येन लभ्यते सुखमक्षयम् ॥ २१ ॥**

**इति ध्यात्वातिकष्टासु माणिक्याचलसीमसु । ददत्पदानि संप्राप शिखरं तस्य स क्रमात् ॥२२॥ युग्मं॥**

अन्वयः-अतिकष्टेन अपि अहं कालेन अपि तत् अमूल्यकं रत्नं ग्रहीष्ये, येन अधुना अक्षयं सुखं लभ्यते, ॥ २१ ॥ इति ध्यात्वा अति कष्टासु माणिक्य अचल सीमसु पदानि ददत् सः क्रमात् तस्य शिखरं संप्राप. ॥ २२ ॥ युग्मं ॥

अर्थः-अति दुःख वेठीने पण हुं (केटलेक) काळे पण तेवुं अमूल्य रत्न ग्रहण करीश के, जेथी तुरत अक्षय सुख मळे, ॥२१॥ एम विचारीने अति प्रयासवाळी एवी ते रोहणाचलनी हदमां पग मूकतो थको (चालतो थको) ते अनुक्रमे तेना शिखरपर पहोंच्यो. ॥ २२ ॥ युग्मं ॥

**यन्माहात्म्येन तन्वन्ति सेवां देवाधिपा अपि । रत्नं तेनेह तत्किंचिदुदञ्चद्रोचिरैक्ष्यत ॥ २३ ॥**

अन्वयः—यत् माहात्म्येन देव अधिपाः अपि सेवां तन्वंति, तत् उदंचत् रोचिः रत्नं तेन इह ऐक्ष्यत. ॥ २३ ॥

अर्थः—जेना प्रभावथी इंद्रो पण सेवा करे, एवां चळकता तेजवाळां रत्नने तेणे अहीं जोयुं ॥ २३ ॥

**महतस्तस्य रत्नस्य दर्शनादेव शुद्धधीः । विश्वत्रयस्याप्युपरि स्फुरितं स्वममन्यत ॥ २४ ॥**

अन्वयः–तस्य महतः रत्नस्य दर्शनात् एव शुद्धधीः स्वं विश्व त्रयस्य अपि उपरि स्फुरितं अमन्यत. ॥ २४ ॥

अर्थः—ते महान रत्नने जोवाथीज ते शुद्ध बुद्धि पोताना आत्माने त्रणे जगतनी उपर रहेलो मानवा लाग्यो. ॥ २४ ॥

**तच्चालोक्यातियत्नेन रत्नमुत्पुलकाकृतिः । धीरो निश्चयधीश्चेतस्येतच्चिन्तयति स्म सः ॥ २५ ॥**

अन्वयः–च तत् रत्नं अति यत्नेन आलोक्य उत्पुलक आकृतिः, निश्चयधीः सः धीरः चेतसि एतत् चिंतयतिस्म. ॥ २५ ॥

अर्थः—पछी ते रत्नने अति प्रयत्नपूर्वक जोइने रोमांचित थयेलो, अने निश्चय बुद्धिवाळो ते मनमां एम विचारवा लाग्यो के,

**स एव ज्ञानवान्पुण्यः कृपागारो गुरुः पुमान् । येनेदृग्रत्नपात्रं मे कथितः पृथिवीधरः ॥ २६ ॥**

अन्वयः–सः एव पुमान् ज्ञानवान्, पुण्यः, कृपा आगारः गुरुः, येन ईदृग् रत्नपात्रं पृथिवी धरः मे कथितः. ॥ २६ ॥

अर्थः–तेज पुरुष ज्ञानी, पवित्र, अने दयाना स्थानरूप गुरु छे, के जेणे आवां रत्नोनां भाजनरूप आ पर्वत मने कह्यो (देखाड्यो).

**अयमेव च रत्नाद्रिः सेव्यो रत्नार्थिभिर्नृभिः । स्युः सर्वेष्वपि शैलेषु रत्नानि कविवागियम् ॥ २७ ॥**

अन्वयः–च रत्न अर्थिभिः नृभिः अयं एव रत्न अद्रिः सेव्यः, सर्वेषु अपि शैलेषु रत्नानि स्युः, इयं कवि वाक्. ॥ २७ ॥

अर्थः—हवे रत्नोना इच्छक पुरुषोए आज रत्नाचलने सेववो जोइये, वळी सर्वकोइ पर्वतोमां रत्नो होय छे, एवी कविओनी वाणी छे. ॥ २७ ॥

**देवः स एव यः कश्चिदस्याद्रेरधिदैवतम् । देवत्वं क्वान्यदेवानां येषां न स्थानमीदृशम् ॥ २८ ॥**

अन्वयः–अस्य अद्रेः यः कश्चित् अधिदैवतं, सः एव देवः, अन्य देवानां देवत्वं क्व? येषां ईदृशं स्थानं न. ॥ २८ ॥

अर्थः—आ पर्वतनो जे कोइ अधिष्टायक देव छे, तेज ( खरो ) देव छे, बीजा देवोने देवपणुं क्यांथी प्राप्त थाय? के जेओने आवुं स्थान मळ्युं न होय. ॥ २८ ॥

**रुचिप्रचितविश्वेऽस्मिन्नपि माणिक्यभूभृति । तमःसमलदृष्टीनामस्ति नास्तीति संशयः ॥ २९ ॥**

अन्वयः–रुचि प्रचित विश्वे अस्मिन् माणिक्य भूभृति अपि, तमः समल दृष्टीनां अस्ति, नास्ति इति संशयः. ॥ २९ ॥

अर्थः—कांतिथी भरेलुं छे जगत जेणे, एवा पण आ माणिक्याचलना संबंधमां, अज्ञानरूपी अंधकारथी मलीन चक्षुवाळाओने, ते छे के, नथी एवो संशय रहेछे. ॥ २९ ॥

दृष्ट्वैनमपि रत्नाद्रिं गिरीनाकाङ्क्षतोऽपरान् । अन्धदृष्टेर्जनस्यास्य कान्तौ ध्वान्तेऽपि नो भिदा ॥ ३० ॥

अन्वयः-एनं रत्न अद्रिं दृष्ट्वा अपि अपरान् गिरीन् आकांक्षतः, अस्य अंध दृष्टेः जनस्य कांतौ ध्वांते अपि भिदा नो. ॥३०॥

अर्थः—आ रत्नाचलने जोइने पण बीजा पर्वतोने इच्छता, एवा ते अंधदृष्टि माणसोने प्रकाश अने अंधकारमां कंइ भेद जणातो नथी.

अयमप्यस्ति रम्योऽद्रिस्तथान्येऽप्यद्रयोऽद्भुताः । यस्य स्याद्विचिकित्सेति स किं पापैर्न लिप्यते ॥३१॥

अन्वयः—अयं अद्रिः अपि रम्यः अस्ति, तथा अन्ये अपि अद्भुताः अद्रयः, यस्य इति विचिकित्सा स्यात् सः पापैः किं न लिप्यते? ॥ ३१ ॥

अर्थः-जेम आ पर्वत पण सारो छे तेम बीजा पर्वतो पण सारा छे, एवी जे परीक्षा करेछे, ते पापोथी केम लींपाय नहि? ॥३१॥

धन्या अन्याद्रिभाजोऽपि यत्नाद्रत्नान्यवाप्नुयुः । इति वार्तापि हास्याय हा स्यादेतद्गिरिस्पृशाम् ॥३२॥

अन्वयः-अन्य अद्रि भाजः अपि धन्याः यत्नात् रत्नानि अवाप्नुयुः, इति वार्ता अपि हा? एतत् गिरि स्पृशां हास्याय. ॥३२॥

अर्थः—बीजा पर्वतोमां रहेनारा भाग्यशालीओ पण प्रयत्नथी रत्नो मेळवी शके छे, एवी वार्ता पण अरेरे! आ पर्वतवासीओने हास्य उपजावे छे. ॥ ३२ ॥

अन्याचलचरैः पुम्भिरेतद्गिरिचरा नराः । दर्शनेनापि लज्जेरन्सहेरन्संस्तवं कुतः ॥ ३३ ॥

अन्वयः–अन्य अचल चरैः पुंभिः एतत् गिरि चराः नराः दर्शनेन अपि लज्जेरन्, संस्तवं कुतः सहेरन् ? ॥ ३३ ॥

अर्थः–बीजा पर्वतोमां फरनारा पुरुषो, आ पर्वतमां फरनारां पुरुषोने नजरे जोवामां पण शरमींदा थाय छे, तो पछी तेमनी प्रशंसाने तेओ क्यांथी सहन करी शके? ॥ ३३ ॥

**धन्योऽहं कृतकृत्योऽहं लब्धजन्मफलोऽप्यहम् । येनासामान्यमाहात्म्यं रत्नमेतदवाप्यते ॥ ३४ ॥**

अन्वयः–अहं धन्यः, अहं कृत कृत्यः, अहं लब्ध जन्म फलः अपि, येन असामान्य माहात्म्यं एतत् रत्नं अवाप्यते. ॥ ३४ ॥

अर्थः–हुं धन्य छुं, हुं कृतार्थ छुं, अने मने आ मनुष्यजन्मनुं फल पण प्राप्त थयुं छे, के जेने असाधारण महिमावाळुं आ (अमूल्य) रत्न प्राप्त थयुं छे. ॥ ३४ ॥

**धिग्निर्भाग्यं जडमतिं मां पुरा येन वासराः । अगम्यन्ततमां हन्त रत्नैस्तैरप्युपार्जितैः ॥ ३५ ॥**

अन्वयः–हंत निर्भाग्यं जडमतिं मां धिक्, येन पुरा उपार्जितैः तैः रत्नैः अपि वासराः अगम्यंततमां. ॥ ३५ ॥

अर्थः–अरेरे ! वळी निर्भागी जडबुद्धिवाळा एवा मने धिक्कार छे ! के जेणे पूर्वे उपार्जन करेलां तेवां रत्नोथी पण दिवसोने (नकामा) गुमाव्या. ॥ ३५ ॥

**इति ध्यायन्हृदि दधौ स तद्रत्नं सुनिश्चलम् । अच्छिद्रमपि यत्प्रोतमनन्तैरमलैर्गुणैः ॥ ३६ ॥**

अन्वयः–इति हृदि ध्यायन् सः सुनिश्चलं तत् रत्नं दधौ, यत् अच्छिद्रं अपि अनंतैः अमलैः गुणैः प्रोतं. ॥ ३६ ॥

अर्थः—एम मनमां विचारता एवा ते शुद्धबुद्धिए ते रत्नने बहुज साचवीने राख्युं, के जे रत्न छिद्ररहित होवा छतां पण अनंता निर्मल गुणोवडे ( दोराओवडे ) परोवायेलुं हतुं. ॥ ३६ ॥

**सुरासुरार्च्यामृद्धिं स प्राप तद्रत्नधारणात् । अचिन्त्यमहिमानो हि मणिमन्त्रौषधीगुणाः ॥ ३७ ॥**

अन्वयः—तद् रत्न धारणात् सः सुर असुर अर्च्यां ऋद्धिं प्राप, हि मणि मंत्र औषधी गुणाः अचिंत्य महिमानः. ॥ ३७ ॥

अर्थः—ते रत्नने धारण करवाथी ते देवो अने दानवोथी पण पूजाती समृद्धिने पाम्यो, केमके मणि, मंत्रो अने औषधीओना गुणो अगम्य माहात्म्यवाळा होय छे. ॥ ३७ ॥

**स प्रतिक्षणतत्सङ्गसुखनिर्भरभावनः । महानन्दमपि प्राप किं न भाग्यभृतां भवेत् ॥ ३८ ॥**

अन्वयः—प्रतिक्षण तत् संग सुख निर्भर भावनः सः महानंदं अपि प्राप, भाग्यभृतां किं न भवेत् ? ॥ ३८ ॥

अर्थः—क्षणक्षणप्रते तेना संगना सुखमां अति श्रद्धा राखनारो ते शुद्धबुद्धि अतिआनंदमय ( मोक्षने ) प्राप्त थयो, ( केमके ) भाग्यशाळीओने शुं प्राप्त थतुं नथी ? ॥ ३८ ॥

**यस्तु योग्यमतिः सोऽपि दिव्यपुंसो गिरां गुणैः । प्रीतः शुद्धमतिं मूलाच्चालोक्य प्रातनिश्चयः ॥३९॥**
**पूर्ववल्लब्धकुद्दालः खानीर्ज्ञाताः खनञ्शनैः । कृतयत्नोऽपि रत्नौघं बहुमूल्यमवाप च ॥ ४० ॥ युग्मम् ॥**

अन्वयः—तु यः योग्यमतिः, सः अपि दिव्य पुंसः गिरां गुणैः प्रीतः, च मूलात् शुद्धमतिं आलोक्य प्राप्त निश्चयः, ॥ ३९ ॥ पूर्ववत् लब्ध कुद्दालः, ज्ञाताः खानीः शनैः खनन्, च कृत यत्नः बहु मूल्यं रत्न ओघं अपि अवाप. ॥ ४० ॥ युग्मं ॥

अर्थः—पछी जे योग्यमति छे, ते पण ते दिव्य पुरुषनी वाणीना गुणोथी खुशी थइने, तथा पेहेलेथी शुद्धमतिनी स्थिति जोवाथी खातरी थयाबाद, ॥ ३९ ॥ ते शुद्धमतिनीपेठे कोदाळी लेइने, प्रसिद्ध खाणोने धीमेधीमे खोदतोथको, प्रयत्न करवाथी अतिकीमती रत्नोना समूहने पण प्राप्त थयो. ॥ ४० ॥ युग्मं ॥

**रत्नमूल्यसुखस्वादः परं किंचिदभूदसौ । तत्र लोकोत्तरं रत्नं लब्धुमादरमादधौ ॥ ४१ ॥**

अन्वयः—असौ किंचित् रत्न मूल्य सुख स्वादः अभूत्, परं तत्र लोक उत्तरं रत्नं लब्धुं आदरं आदधौ. ॥ ४१ ॥

अर्थः—ते योग्यमति ते रत्ननी किमतथी कंइक सुखना स्वादवाळो तो थयो, परंतु ( पाछो ) लोकोत्तर ( अमूल्य ) रत्न मेळववा माटे ते प्रयत्न करवा लाग्यो. ॥ ४१ ॥

**गत्वा किंचित्पुरं दिव्यं रत्नाप्तश्रीः स्थितः सुखम् । स ईहासहसंपन्नभोगयोगश्चिरं स्थिरः ॥ ४२ ॥**

अन्वयः—किंचित् दिव्यं पुरं गत्वा, रत्न आप्त श्रीः सः ईहा सह संपन्न भोग योगः चिरं स्थिरः सुखं स्थितः. ॥ ४२ ॥

अर्थः—(पछी) कोइक दिव्य नगरमां जइने, ते रत्नथी मळेली लक्ष्मीवाळो थयो थको ते योग्यमति इच्छामुजब मळेला भोगोने भोगवतो थको घणा काळसुधी स्थिर थइने सुखेथी ( त्यां ) रह्यो. ॥ ४२ ॥

**क्षीणश्रीः प्राप्य रत्नानि श्रिये माणिक्यशैलतः । जगाम कामं दिव्यानि भूयो भूयः पुराणि सः ॥४३॥**

अन्वयः–क्षीण श्रीः श्रिये माणिक्य शैलतः रत्नानि प्राप्य, भूयः भूयः सः कामं दिव्यानि पुराणि जगाम. ॥ ४३ ॥

अर्थः—वळी निर्धन थवाथी द्रव्य मेळववामाटे ते माणिक्याचलमांथी रत्नो मेळवी मेळवीने वारंवार ते योग्यमति सुखेसमाधे ते दिव्य नगरोमां जवा लाग्यो. ॥ ४३ ॥

**रत्नद्वीपे स माणिक्यगिरिं गत्वा कदाचन । सप्ताष्टवारसंचारखिन्नश्चेतस्यचिन्तयत् ॥ ४४ ॥**

अन्वयः–कदाचन सः रत्नद्वीपे माणिक्य गिरिं गत्वा, सप्त अष्ट वार संचार खिन्नः चेतसि अचिंतयत्. ॥ ४४ ॥

अर्थः–पछी एकदिवसे तो ते योग्यमति रत्नद्वीपमां रहेला ते माणिक्याचलपर जइने, सात आठवार ( त्यां ) आववा जवाथी थाकीने मनमां विचारवा लाग्यो के, ॥ ४४ ॥

**पुंसा दिव्येन मे तावदधुनापि हितैषिणा । अमूल्यरत्नमादिष्टं नित्यसौख्यस्य कारणम् ॥ ४५ ॥**

अन्वयः–अधुना अपि हितैषिणा दिव्येन पुंसा मे तावत् नित्य सौख्यस्य कारणं अमूल्य रत्नं आदिष्टं. ॥ ४५ ॥

अर्थः–हजु पण ( मारुं ) हित इच्छता ते दिव्य पुरुषे मने तो शाश्वत सुखनुं कारणभूत अमूल्य रत्न लेवानुं कह्युं छे. ॥ ४५ ॥

**ततस्तल्लब्धये यत्नं कुर्वे चक्रे च तं तथा । प्राप्यामूल्यं च तद्रत्नं स शुद्धमतिवद्बभौ ॥ ४६ ॥**

अन्वय.–ततः तत् लब्धये यत्नं कुर्वे, च तथा तं चक्रे, च तत् अमूल्यं रत्नं प्राप्य स. शुद्धमतिवत् बभौ. ॥ ४६ ॥

अर्थः—माटे ते मेळववामाटे हुं प्रयत्न करुं, ( एम विचारी ) पछी तेणे तेवोज प्रयत्न कर्यो अने ते अमूल्य रत्न मेळवीने ते (पण) शुद्धमतिनीपेठेज शोभवा लाग्यो. ॥ ४६ ॥

**यस्तु मन्दमतिर्नाम स दिव्यपुरुषोक्तिषु । ईदृग्विमर्शस्पर्शेन वितेने तरलं मनः ॥ ४७ ॥**

अन्वयः–यः तु मंदमतिः नाम, सः दिव्य पुरुष उक्तिषु, ईदृग् विमर्श स्पर्शेन मनः तरलं वितेने. ॥ ४७ ॥

अर्थः—हवे जे मंदमतिनामनो मनुष्य हतो, ते तो ते दिव्य पुरुषना वचनोमाटे नीचे मुजब विचार करतोथको मनने चपल करवा लाग्यो के, ॥ ४७ ॥

**प्रत्यक्षाणि परिक्षिप्य रत्नान्येतानि रुक्पदम् । लगेद्वाक्येऽस्य कः सत्यासत्यसंशयगोचरे ॥ ४८ ॥**

अन्वयः–रुक् पदं एतानि प्रत्यक्षाणि रत्नानि परिक्षिप्य अस्य सत्य असत्य संशय गोचरे वाक्ये कः लगेत्. ॥ ४८ ॥

अर्थः—तेजनां स्थानरूप आ प्रत्यक्ष देखातां रत्नोने ( पांचीकाओने ) फेंकी देइने आ पुरुषना साचाखोटाना संदेहवाळा वचनमां कोण विश्वास राखे? ॥ ४८ ॥

**इति निश्चित्य तैरेव ग्रावखण्डैरखण्डमुत् । पुरं गन्तुमना दिव्यं क्वचित्पल्लीं पपात सः ॥ ४९ ॥**

अन्वयः–इति निश्चित्य तैः एव ग्रावखंडैः अखंड मुत्, दिव्यं पुरं गंतुमनाः सः क्वचित् पल्लीं पपात. ॥ ४९ ॥

अर्थः—एवो निश्चय करीने तेज पत्थरना टुकडाओथी (पांचीकाओथी) अनुपम सुख मानतोथको दिव्यनगरमां जवाने इच्छतां छतां पण ते कोइक (भील्लोनी) पल्लीमां जइ वस्यो. ॥ ४९ ॥

**ततस्तदुचितप्राप्तस्वल्पमूल्योपभोगभुक् । निनाय स दिनान्यत्र संकरे सुखदुःखयोः ॥ ५० ॥**

अन्वयः–ततः तत् उचित प्राप्त स्वल्प मूल्य उपभोग भुक् सः, अत्र सुख दुःखयोः संकरे दिनानि निनाय ॥ ५० ॥

अर्थः—पछी ते पांचीकाओनी किमतजेटलांज स्वल्प द्रव्यथी भोगो भोगवतोथको ते त्यांज सुखदु खना संगमवाळा दिवसो वीताडवा लाग्यो. ॥ ५० ॥

**भुक्तश्रीर्यत्र तत्रापि स भ्रमन्नभ्रवत्पुनः । रत्नद्वीपं ययौ दैवाद्ग्रावखण्डान्यवाप च ॥ ५१ ॥**

अन्वयः–भुक्त श्रीः सः अभ्रवत् यत्र तत्र भ्रमन् अपि पुनः दैवात् रत्न द्वीपं ययौ, च ग्राव खंडानि अवाप. ॥ ५१ ॥

अर्थः–ते द्रव्य खवाइ गयाबाद ते मंदमति वादळांनीपेठे ज्यां त्यां भमतोथको पण पाछो दैवयोगे रत्नद्वीपमां गयो, अने (त्यांथी) तेणे (पाछा) ते पत्थरोना टुकडा मेळव्या. ॥ ५१ ॥

**ततस्तदुचितावाप्तस्थानश्रीदुःखजीवनः । गतागतशतान्येवं हताशः प्रततान सः ॥ ५२ ॥**

अन्वयः–ततः तत् उचित अवाप्त स्थान श्री दुःख जीवनः सः हताशः एवं गत आगत शतानि प्रततान. ॥ ५२ ॥

अर्थः—पछी ते पांचीकाओने योग्य स्थान अने द्रव्य मेळवीने दुःखे जींदगी गुजारतोथको निराश थइने ते एवीरीते सेंकडो-

वार आवजाव करवा लाग्यो. ॥ ५२ ॥

**सोऽपि कालेन निर्विण्णस्तन्वानो दिव्यपुंवचः । माणिक्यगिरिमाश्रित्य भेजे शुद्धमतेर्गतिम् ॥ ५३ ॥**

अन्वयः–सः अपि कालेन निर्विण्णः दिव्य पुं वचः तन्वानः माणिक्य गिरिं आश्रित्य शुद्धमतेः गतिं भेजे. ॥ ५३ ॥

अर्थः—पछी ते पण केटलेक काळे थाकीने, ते दिव्य पुरुषना कहेवामुजब वर्तीने, तथा ते माणिक्याचलनो आश्रय लेइने शुद्धमतिनी गति (मोक्ष) पाम्यो. ॥ ५३ ॥

**यस्तु दुर्मतिराकर्ण्य स दिव्यपुरुषस्य गाम् । स्वनामार्हविचारेऽत्र स्थिरं व्यरचयन्मनः ॥ ५४ ॥**

अन्वयः–तु यः दुर्मतिः, सः दिव्य पुरुषस्य गां आकर्ण्य अत्र स्व नाम अर्ह विचारे मनः स्थिरं व्यरचयत्. ॥ ५४ ॥

अर्थः—हवे जे दुर्मति नामनो (चोथो माणस हतो) तेणे तो ते दिव्य पुरुषनी वाणी सांभळीने, पोताना नामने लायक एवा (नीचे मुजब) दुष्ट विचारोमांज (पोतानुं) मन स्थिर कर्युं. ॥ ५४ ॥

**महत्त्वं माययापन्नः कोऽप्ययं मायिकः पुमान् । विप्रतारयति स्वैरं रत्नद्वीपचरान्नरान् ॥ ५५ ॥**

अन्वयः–मायया महत्त्वं आपन्नः अयं कः अपि मायिकः पुमान् रत्नद्वीप चरान् नरान् स्वैरं विप्रतारयति. ॥ ५५ ॥

अर्थः—कपटथी म्होटाइ पामेलो आ कोइक कपटी पुरुष रत्नद्वीपमां विचरनारा पुरुषोने पोतानी मरजी मुजब ठग्या करे छे.।५५।

**विलोभ्य कोमलोक्त्यायमायातं जनमादरात् । नीत्वा क्वचन गृह्णाति शम्बलं स्वमपि क्षणात् ॥ ५६ ॥**

अन्वयः-अयं आयातं जनं कोमल उक्त्या आदरात् विलोभ्य, क्वचन नीत्वा क्षणात् स्वं शंबलं अपि गृह्णाति. ॥ ५६ ॥

अर्थः—ते पुरुष आवेला माणसने कोमल वचनथी आदरमानपूर्वक ललचावीने, क्यांक उपाडी जइ क्षणवारमां तेनी पोतानी मूडी पण खुंचवी ले छे. ॥ ५६ ॥

**पापाचारे विचारेऽस्मिन्निश्चलं रचयन्मनः । रत्नद्वीपस्य पन्थानमप्यमुञ्चत दुर्मतिः ॥ ५७ ॥**

अन्वयः-अस्मिन् पाप आचारे मनः निश्चलं रचयन् दुर्मतिः रत्नद्वीपस्य पंथानं अपि अमुंचत. ॥ ५७ ॥

अर्थः—एवी रीतना दुष्ट आचरणमां (पोतानुं) मन स्थिर करतांथकां ते दुर्मतिए रत्नद्वीपना मार्गनो पण त्याग कर्यो. ॥ ५७ ॥

**कूपावर्तशिलागर्तपङ्ककण्टकसंकटे । स महागहनेऽरण्ये क्वचिन्निःपुण्यकोऽपतत् ॥ ५८ ॥**

अन्वयः—सः निःपुण्यकः क्वचित् कूप आवर्त शिला गर्त पंक कंटक संकटे महागहने अरण्ये अपतत्. ॥ ५८ ॥

अर्थः—ते निर्भागी दुर्मति कोइक कूवा, घूना, खडको, खाडा, कादव, तथा कांटाओथी भरेला अति भयंकर जंगलमां जइ पड्यो.

**दुष्टजीवघटाघट्टकष्टितस्तेषु तेषु च । दुःस्थानेषु पतञ्जज्ञेऽरण्यान्निर्गन्तुमक्षमः ॥ ५९ ॥**

अन्वयः—च दुष्ट जीव घटा घट्ट कष्टितः, तेषु तेषु दुःस्थानेषु पतन् अरण्यात् निर्गंतु अक्षमः जज्ञे. ॥ ५९ ॥

अर्थः-पछी (त्यां) घातकी प्राणीओनी श्रेणिना समागमथी दुःखी थयोथको (उपर वर्णवेलां) ते ते दुःस्थानोमां पडतो आखडतो ते जंगलमांथी बहार निकळीज शक्यो नही. ॥ ५९ ॥

**आकर्ण्य धीधनैरेतदन्तरङ्गनिदर्शनम् । ततः प्रथमवद्भाव्यं न पुनश्चरमो यथा ॥ ६० ॥**

अन्वयः—ततः एतत् अंतरंग निदर्शनं आकर्ण्य धी धनैः प्रथमवत् भाव्यं, पुनः यथा चरमः, न. ॥ ६० ॥

अर्थः—माटे आ अंतरंग दृष्टांत सांभळीने बुद्धिवानोए पेहेला शुद्धमतिपुरुषनीपेठे थवुं, परंतु छेल्ला दुर्मतिपुरुषसरखुं थवुं नही.

**निगोदवसनं यत्तदनन्तजनपत्तनम् । तत्र कालपरीणामो नाम चित्रगतिर्नृपः ॥ ६१ ॥**

अन्वयः—यत् निगोद वसनं, तत् अनंत जनपत्तनं, तत्र काल परीणामः चित्रगतिः नाम नृपः. ॥ ६१ ॥

अर्थः—जे निगोदमां निवास, तेने अनंतजननामनुं नगर जाणवुं, अने त्यां कालपरीणामरूप चित्रगतिनामनो राजा जाणवो.

**भव्यस्तद्भवसिद्धोऽसौ जीवः शुद्धमतिस्तु यः । आसन्नसिद्धिको योग्यमतिर्भव्योपमः स च ॥ ६२ ॥**

अन्वयः—तु यः शुद्धमतिः, असौ तद् भव सिद्धः भव्यः जीवः, च योग्यमतिः, सः आसन्न सिद्धिकः भव्य उपमः. ॥ ६२ ॥

अर्थः—वळी जे शुद्धमति छे, तेने तेज भवमां मोक्षे जानारो भव्य जीव जाणवो, अने जे योग्यमति छे, तेने नजदीक सिद्धिवाळो भव्यजीवसरखो जाणवो. ॥ ६२ ॥

**दूरभव्यस्त्वसौ मन्दमतिर्मन्दगतिर्भवे । अभव्यो दुर्मतिर्ज्ञेयोऽनन्तसंसारदुःखभाक् ॥ ६३ ॥**

अन्वयः—तु मंदमतिः, असौ भवे मंद गतिः दूरभव्यः, दुर्मतिः अनंत संसार दुःख भाक् अभव्यः ज्ञेयः. ॥ ६३ ॥

अर्थः—वळी जे मंदमति छे, तेने संसारमां धीमी गतिवाळो दूरभव्य जाणवो, अने जे दुर्मति छे, तेने अनंता संसारमां भमी दुःख भोगवनारो अभव्य प्राणी जाणवो. ॥ ६३ ॥

**जीवाश्चतुर्विधाः कालपरिणामवशादमी । आजग्मुर्व्यवहाराख्यराशौ ते कथमप्यथ ॥ ६४ ॥**

अन्वयः-अथ ते अमी चतुर्विधाः जीवाः कथं अपि कालपरिणाम वशात् व्यवहार आख्य राशौ आजग्मुः. ॥ ६४ ॥

अर्थः-पछी ते आ चारे प्रकारना जीवो केटलेक प्रयासे ते कालपरिणाम राजानी मेहेरबानीथी व्यवहारनामनी राशिमां आव्या.

**कुग्रामाः कुभवास्तापशीतवातादिकष्टजम् । अकामनिर्जरापुण्यमल्पमल्पं स्वशम्बलम् ॥ ६५ ॥**

अन्वयः-कुग्रामाः कुभवाः, ताप शीत वात आदि कष्ट जं अकाम निर्जरा पुण्यं अल्पं अल्पं स्वशंबलं. ॥ ६५ ॥

अर्थः-वळी नरकआदिक कुगतिओरूप कुग्रामो जाणवां, अने त्यांना ताप, टाढ, तथा वायु आदिकना कष्टथी उत्पन्न थयेली अकामनिर्जराना पुण्यरूप स्वल्प स्वल्प शंबल ( द्रव्यनी मूडी ) जाणवुं. ॥ ६५ ॥

**मानुष्यकभवो रत्नद्वीपस्तत्र कुपर्वताः । कुतीर्थानि कुरत्नानि तत्राज्ञानतपांसि च ॥ ६६ ॥**

अन्वयः-मानुष्यक भवः रत्नद्वीपः, तत्र कुतीर्थानि कुपर्वताः, च तत्र अज्ञान तपांसि कुरत्नानि. ॥ ६६ ॥

अर्थः—वळी मनुष्यभवने रत्नद्वीप जाणवो, अने तेमां मिथ्यादर्शनोने कुपर्वतो जाणवा, तथा त्यां अज्ञानतपोने कुरत्नो (पांचीका ) जाणवा. ॥ ६६ ॥

चारित्रं विटपी तत्र सद्गुरुः पुरुषो महान् । कृपा तत्प्रेयसी विश्वत्रयजन्तुहिता स्मृता ॥ ६७ ॥

अन्वयः—तत्र चारित्रं विटपी, सद्गुरुः महान् पुरुषः, विश्व त्रय जंतु हिता कृपा तत् प्रेयसी स्मृता. ॥ ६७ ॥

अर्थः—त्यां चारित्ररूपी वृक्ष जाणवुं, अने सद्गुरुरूपी महान् पुरुष जाणवो, तथा त्रणे जगतना प्राणीओनुं हित करनारी दयारूपी तेनी स्त्री जाणवी. ॥ ६७ ॥

सर्वज्ञशासनं यच्च स माणिक्यमहीधरः । ध्यानं कुद्दालकः कर्मखानीनां खनने क्षमः ॥ ६८ ॥

अन्वयः—च यत् सर्वज्ञ शासनं, सः माणिक्य महीधरः, ध्यानं कर्म खानीनां खनने क्षमः कुद्दालकः. ॥ ६८ ॥

अर्थः—वळी जे सर्वज्ञप्रभुनुं शासन, तेने माणिक्यपर्वत जाणवो, अने शुभ ध्यानने कर्मोरूपी खाणो खोदवामां समर्थ कोदाळी जाणवी.

सुतपोभ्यस्तु सत्पुण्या रत्नश्रेणिरदूषणा । सम्यक्त्वं तच्च रत्नाद्रिकोटौ रत्नं यदुत्तमम् ॥ ६९ ॥

अन्वयः—तु सुतपोभ्यः सत्पुण्या अदूषणा रत्नश्रेणिः, च रत्न अद्रि कोटौ यत् उत्तमं रत्नं तत् सम्यक्त्वं. ॥ ६९ ॥

अर्थः—वळी उत्तम प्रकारना तपथी मळेलां उत्तम पुण्यरूपी निर्दोष रत्नोनी पंक्ति जाणवी, अने ते रत्नाचलनी मेखलामां जे उत्तम रत्न कह्युं, ते सम्यक्त्व जाणवुं. ॥ ६९ ॥

पश्चातिचारसंहारो माणिक्याद्रिस्तुतिच्छलात् । सुरासुरार्च्या लक्ष्मीर्या केवलज्ञानमेव तत् ॥ ७० ॥

अन्वयः-माणिक्य अद्रि स्तुति च्छलात् पंच अतिचार संहारः, या सुर असुर अर्च्या लक्ष्मीः, तत् केवलज्ञानं एव. ॥ ७० ॥
अर्थः—ते माणिक्याचलनी प्रशंसाना मिषथी पांचे अतिचारोनो परिहार (सूचव्यो छे) अने देवो तथा दानवोथी पूजायेली जे लक्ष्मी कही, ते केवलज्ञानज (जाणवुं.) ॥ ७० ॥

**यस्तत्सङ्गान्महानन्दः स मोक्षगमनोत्सवः । भव्यः कोऽपि भवेऽत्रैव कृतकृत्यो भवेदिति ॥ ७१ ॥**

अन्वयः-तत् संगात् यः महानंदः, सः मोक्ष गमन उत्सवः, इति कः अपि भव्यः अत्र एव भवे कृतकृत्यः भवेत्. ॥ ७१ ॥
अर्थः-ते केवलज्ञानना संगथी जे महान् आनंद कह्यो, ते मोक्षगमनरूप हर्ष जाणवो, अने ए रीते कोइक भव्य मनुष्य आ भवमांज कृतार्थ थइ शके छे. ॥ ७१ ॥

**आसन्नसिद्धिकस्तु स्यात्सस्पृहस्तपसां फले । भवेषु दिव्यद्रङ्गेषु भोगास्तन्मूल्यजं फलम् ॥ ७२ ॥**

अन्वयः-तु आसन्न सिद्धिकः तपसां फले सस्पृहः स्यात्, दिव्य द्रंगेषु भवेषु भोगाः, तत् मूल्यजं फलं. ॥ ७२ ॥
अर्थः—वळी नजीक सिद्धिवाळो मनुष्य तपना फलने इच्छनारो थाय छे, अने तेथी दिव्य नगरोमां जन्मीने जे भोगो ते भोगवे छे, ते तेना तपनी किम्मतनुं फल जाणवुं ॥ ७२ ॥

**सप्ताष्टवारं यामुष्य सुपुरेषु गतागतिः । पुण्योदयव्ययोत्थाना नरामरभवास्तु ते ॥ ७३ ॥**

अन्वयः–अमुष्य सुपुरेषु या सप्त अष्ट वारं गत आगतिः, ते तु पुण्य उदय व्यय उत्थानाः नर अमर भवाः. ॥ ७३ ॥

अर्थः–वळी ते माणसनुं उत्तम नगरोमां सात आठ वखत जे आवागमन थयुं, ते पुण्यना उदयरूप ( मळेलां द्रव्यना ) खरचाइ जवाथी थयेला मनुष्य अने देवोना भवो जाणवा. ॥ ७३ ॥

**दूरभव्यस्य यो दिव्यपुरीगमनमिच्छतः । पल्लीपातोऽल्पभोगर्द्धिभूतप्रेतादिजन्म तत् ॥ ७४ ॥**

अन्वयः–दिव्य पुरी गमनं इच्छतः दूर भव्यस्य यः पल्ली पातः, तत् अल्प भोग ऋद्धि भूत प्रेत आदि जन्म. ॥ ७४ ॥

अर्थः—दिव्य नगरमां जवानी इच्छा करता, एवा दूरभव्य मनुष्यनुं जे ( भिल्लोनी ) पल्लीमां जइ पडवुं कह्युं, ते स्वल्प भोगोनी समृद्धिवाळा भूत, प्रेत आदिकोना भवो जाणवा. ॥ ७४ ॥

**भ्रमन्भूरीन्भवान्दूरभव्योऽपि सुखदुःखभाक् । गुरोर्गिरं पुनः प्राप्य भव्यीभूय शिवं श्रयेत् ॥ ७५ ॥**

अन्वयः—सुख दुःख भाक् दूर भव्यः अपि भूरीन भवान् भ्रमन्, पुनः गुरोः गिरं प्राप्य भव्यीभूय शिवं श्रयेत्. ॥ ७५ ॥

अर्थः—सुख दुःख भोगवतोथको ते दूरभव्य पण घणा भवोमां भमीने, पाछो गुरुमहाराजनो उपदेश पामीने भव्य थइ मोक्षे जइ शके छे. ॥ ७५ ॥

**अभव्यस्तु गुरुद्वेषान्मर्त्यजन्माध्वदूरगः । विशत्यरण्ये दुर्जन्मचयसंचारनामनि ॥ ७६ ॥**

अन्वयः—तु अभव्यः गुरु द्वेषात् मर्त्य जन्म अध्व दूरगः, दुर्जन्म चय संचार नामनि अरण्ये विशति. ॥ ७६ ॥

अर्थः—अने अभव्य तो गुरुपरना द्वेषथी मनुष्यजन्मना मार्गथी दूर रह्योथको दुर्गतिओना समूहमां जन्मवारूप जंगलमां जइ पडे छे.

**दुःकर्मनामभिर्दुष्टजीवैस्तत्रातिघट्टितः । दुःखस्थानेषु कूपादिस्थानीयेषु पतत्यसौ ॥ ७७ ॥**

अन्वयः—तत्र दुःकर्म नामभिः दुष्ट जीवैः अतिघट्टितः असौ कूप आदि स्थानीयेषु दुःख स्थानेषु पतति. ॥ ७७ ॥

अर्थः—त्यां दुष्कर्मो नामना दुष्ट प्राणीओथी अत्यंत पीडित थयोथको ते कूवाआदिक स्थानसरखां ( नरकआदिकरूप ) दुःखमय स्थानोमां जइ पडे छे. ॥ ७७ ॥

**कष्टात्कष्टान्तरे स्पष्टं पतन्नेषु मुहुर्मुहुः । अयं कुजन्मनां पारं कदाचिदपि न व्रजेत् ॥ ७८ ॥**

अन्वयः—एषु स्पष्टं मुहुः मुहुः कष्टात् कष्टांतरे पतन् अयं कदाचित् अपि कुजन्मनां पारं न व्रजेत्. ॥ ७८ ॥

अर्थः—ते स्थानकोमां प्रगटपणे वारंवार एक दुःखमांथी बीजां दुःखमां पडतो थको ते अभव्य माणस कोइ वखते पण कुजन्मोनो पार पामी शकतो नथी. ॥ ७८ ॥

**इत्यन्तरङ्गदृष्टान्तमवबुध्य सुबुद्धयः । अहितत्यागतः सन्तः सन्तु स्वस्य हिते रताः ॥ ७९ ॥**

अन्वयः—इति अंतरंग दृष्टांतं अवबुध्य सुबुद्धयः संतः अहित त्यागतः स्वस्य हिते रताः संतु. ॥ ७९ ॥

अर्थः—एरीते आ अंतरंग दृष्टांतनुं मनन करीने उत्तम बुद्धिवाळा सज्जनो अहितनो त्याग करीने पोताना हितमां तत्पर थाओ ?

**॥ आ रीते चार प्रकारना जीवोना विचार संबंधि अंतरंग कथा कही. ॥**

इत्याकर्ण्य सुधापूर्णकर्णा वर्ण्यं विभोर्वचः । बभूवुरुद्यता बोधमहिताः स्वहिते जनाः ॥ ८० ॥

अन्वयः—इति विभोः वर्ण्यं वचः आकर्ण्य सुधा पूर्ण कर्णाः, बोधमहिताः जनाः स्वहिते उद्यताः बभूवुः. ॥ ८० ॥

अर्थः—एरीते प्रभुना उमदां वचनो सांभळीने (जाणे) अमृतथी भरायेला श्रवणोवाळा, अने प्रबोध पामेला लोको पोतानुं श्रेय करवामां उद्यमवंत थया. ॥ ८० ॥

बहवो लघुकर्माणः सूक्ष्माद्याः सूक्ष्मदर्शिनः । विभुं विज्ञापयांचक्रुः कोशीकृतकरा नराः ॥ ८१ ॥

अन्वयः—लघु कर्माणः, सूक्ष्म दर्शिनः सूक्ष्म आद्याः बहवः नराः कोशीकृत कराः विभुं विज्ञापयांचक्रुः. ॥ ८१ ॥

अर्थः—हलुकर्मी तथा सूक्ष्मरीते तत्वने जोनारा सूक्ष्मआदिक घणा पुरुषो (पोताना) हाथ जोडीने प्रभुने विनववा लाग्या के,

प्रभो भ्रान्तैर्महारण्ये सार्थनाथ इवोत्तमः । पतद्भिरवटे हस्तावलम्ब इव दार्ढ्यवान् ॥ ८२ ॥

क्षुधादग्धैरभीष्टान्नसत्रागारमिवाग्रतः । रोगग्रस्तैर्महावैद्य इवादरणसुन्दरः ॥ ८३ ॥

मरौ ग्रीष्मेऽह्नि संचारात्खिन्नैः सर इवाद्भुतम् । प्रवासस्थैः प्रियालोक इवास्तोकमतर्कितः ॥ ८४ ॥

शत्रुशस्त्राहतित्रस्तैः शरण्यः शक्तिमानिव । नदीपूररयाकृष्टैः सत्तारक इवोद्यतः ॥ ८५ ॥

मन्त्रसेवार्दितैस्तुष्टदेवीवर इवोत्तरः । अस्माभिर्भवदुःखार्तैर्लब्धस्त्वं श्रेयसां निधिः ॥ ८६ ॥

अन्वयः-(हे) प्रभो! महारण्ये भ्रांतैः उत्तमः सार्थ वाहः इव, अवटे पतद्भिः दार्ढ्यवान् हस्त अवलंबः इव, ॥ ८२ ॥ क्षुधा दग्धैः अग्रतः अभीष्ट अन्न सत्र आगारं इव, रोग ग्रस्तैः आदरण सुंदरः महावैद्यः इव, ॥ ८३ ॥ मरौ ग्रीष्मे अह्नि संचारात् खिन्नैः अद्भुतं सरः इव, अस्तोकं प्रवास स्थैः अतर्कितः प्रिय आलोकः इव, ॥ ८४ ॥ शत्रु शस्त्र आहति त्रस्तैः शक्तिमान् शरण्यः इव, नदी पूर रय आकृष्टैः उद्यतः सत्तारकः इव, ॥ ८५ ॥ मंत्र सेवा अर्दितैः उत्तरः तुष्ट देवी वरः इव, श्रेयसां निधिः त्वं भव दुःख आर्तैः अस्माभिः लब्धः. ॥ ८६ ॥ पंचभिः कुलकं ॥

अर्थः-हे प्रभु! भयंकर जंगलमां भूला पडेलाओने उत्तम सार्थवाहसरखा, खाडामां पडेलाओने हाथनो मजबुत टेको आपनारा-सरखा, ॥ ८२ ॥ क्षुधाथी पीडायेलाओने नजीकमां रहेली मनवांछित भोजननी दानशाळासरखा, रोगीओने स्वीकारवालायक महान् वैद्यसरखा, ॥ ८३ ॥ मारवाडमां उनाळाना दिवसमां मुसाफरी करवाथी थाकेलाओने मनोहर तळाव सरखा, घणा समयथी परदेश गयेलाओने अचानक प्रियना मेलापसरखा, ॥ ८४ ॥ शत्रुना शस्त्रोना प्रहारथी डरेलाओने शक्तिवान मददगारसरखा, नदीना पूरना वेगमां तणाताओने (बहार कहाडवामाटे) तैयार थयेला उत्तम तारुसरखा. ॥ ८५ ॥ अने मंत्रजापथी कंटाळेलाओने तुष्टमान थयेली देवीना वरदानसरखा, तथा कल्याणना निधानसरखा एवा आप संसारिक दुःखोथी पीडायेला एवा अमोने प्राप्त थया छो. ॥ ८६ ॥ पंचभिःकुलकं ॥

**तदस्मान्करुणाम्भोधे रक्ष रक्षाभितो भवात् । प्रसीद देहि दीक्षां नः शिक्षय श्रमणक्रियाम् ॥ ८७ ॥**

अन्वयः–तत् (हे) करुणा अंभोधे! इतः भवात् अस्मान् रक्ष? रक्ष? प्रसीद? नः दीक्षां देहि? श्रमण क्रियां शिक्षय? ॥८७॥

अर्थः—माटे हे करुणासागर! आ संसारथी (आप) अमारुं रक्षण करो? रक्षण करो? (अमारापर) कृपा करो? अने अमोने दीक्षा आपो? तथा साधुओनी क्रिया शिखवो? ॥ ८७ ॥

**एवमभ्यर्थितस्तेभ्यः श्रीसर्वज्ञो यथाविधि। सूक्ष्मादिभ्यो ददौ दीक्षां व्रतशिक्षां च तत्क्षणात् ॥८८॥**

अन्वयः–एवं अभ्यर्थितः श्रीसर्वज्ञः तेभ्यः सूक्ष्म आदिभ्यः यथाविधि दीक्षां, च तत्क्षणात् व्रत शिक्षां ददौ. ॥ ८८ ॥

अर्थः—एरीते प्रार्थना करवाथी ते श्रीसर्वज्ञप्रभुए ते सूक्ष्मआदिकोने विधिपूर्वक दीक्षा, तथा तेज क्षणे चारित्रसंबंधी शिखामण आपी. ॥ ८८ ॥

**सूक्ष्माद्याः साधवः साध्व्यो धरणीप्रमुखा बभुः। श्रावकाः सुयशोमुख्याः श्राविकाश्च जयादिकाः ॥८९॥**

अन्वयः–सूक्ष्म आद्याः साधवः, धरणी प्रमुखाः साध्व्यः, सुयशः मुख्याः श्रावकाः, च जया आदिकाः श्राविकाः बभुः.

अर्थः–(एवी रीते) सूक्ष्म आदिक साधुओ, धरणी आदिक साध्वीओ, सुयशआदिक श्रावको, अने जयाआदिक श्राविकाओ थइ.

**इत्थं चतुर्विधं सङ्घमघसंघातघातकम्। वासुपूज्यो जगत्पूज्यं स्थापयामास सुस्थितम् ॥ ९० ॥**

अन्वयः–इत्थं वासुपूज्यः अघ संघात घातकं, जगत् पूज्यं चतुर्विधं संघं सुस्थितं स्थापयामास. ॥ ९० ॥

अर्थः–एरीते ते श्रीवासुपूज्य भगवाने, पापोना समूहनो नाश करनारा, तथा जगतने पूजनीक, एवा चतुर्विधसंघनी निश्चलपणे

स्थापना करी. ॥ ९० ॥

**यदा ज्ञानं विभोर्भावि ग्रहीष्येऽहं तदा व्रतम् । इति ध्यानवती पद्मावती नाथेन दीक्षिता ॥ ९१ ॥**

अन्वयः—विभोः यदा ज्ञानं भावि, तदा अहं व्रतं ग्रहीष्ये, इति ध्यानवती पद्मावती नाथेन दीक्षिता. ॥ ९१ ॥

अर्थः—प्रभुने ज्यारे केवलज्ञान थशे, त्यारे हुं दीक्षा लेइश, एवा विचारवाळी पद्मावतीने प्रभुए दीक्षा आपी. ॥ ९१ ॥

**तत्त्वप्रश्नत्रयेणाथ नाथस्तेषां महात्मनाम् । सूक्ष्मादीनां तु षट्षष्टेर्गणभृन्नामकर्मणाम् ॥ ९२ ॥**

**उत्पत्तिर्विगमो ध्रौव्यं क्रमादिति पदत्रयम् । त्रिकालज्ञस्तदाचख्यौ श्रुतद्रोर्बीजमादिमम् ॥ ९३ ॥**

अन्वयः—अथ त्रिकाल ज्ञः नाथः गणभृत् नाम कर्मणां तेषां सूक्ष्मआदीनां षट्षष्टेः महात्मनां तु तत्त्व प्रश्न त्रयेण, श्रुत द्रोः तत् आदिमं बीजं, उत्पत्तिः, विगमः ध्रौव्यं इति पदत्रयं तदा क्रमात् आचख्यौ. ॥ ९२ ॥ ९३ ॥ युग्मं ॥

अर्थः—पछी त्रिकालज्ञानी एवा ते प्रभुए गणधरनामकर्मवाळा ते सूक्ष्मआदिक छासठ महात्माओने तो त्रण तत्वोना प्रश्नथी, श्रुतज्ञानरूपी वृक्षना ते आदिबीजसरखा उत्पाद, व्यय अने ध्रौव्य ( उत्पत्ति, विनाश अने निश्चलता ) रूप त्रण पदो ते वखते अनुक्रमे कह्यां. ॥ ९२ ॥ ९३ ॥ युग्मं ॥

**त्रिपदानुस्मृतेरेकादशाङ्गानि वितेनिरे । ते चतुर्दशपूर्वस्थमङ्गं द्वादशमप्यथ ॥ ९४ ॥**

अन्वयः-अथ ते त्रिपद अनुसृतेः एकादश अंगानि, चतुर्दश पूर्वस्थं द्वादशं अपि वितेनिरे ॥ ९४ ॥

अर्थः—पछी तेओए ते त्रिपदीने अनुसारे अग्यारे अंगो रच्यां अने चौद पूर्वोमां रहेलुं बारमुं अंग पण रच्युं. ॥९४॥

**सुगन्धिचूर्णसंपूर्णं तूर्णं शक्रः सुरैर्वृतः । प्रस्तावज्ञो मणिस्थालं गृहीत्वास्थात्पुरः प्रभोः ॥ ९५ ॥**

अन्वयः-प्रस्तावज्ञः, सुरैः वृतः शक्रः तूर्णं सुगंधि चूर्ण संपूर्ण मणि स्थालं गृहीत्वा प्रभोः पुरः अस्थात्.

अर्थः—( ते समये ) अवसरने जाणनारो, तथा देवोथी वींटायेलो इंद्र तुरत सुगंधी चूर्णथी भरेलो मणिनो थाळ लेइने प्रभुनी पासे आवी उभो. ॥ ९५ ॥

**उत्थायाथ प्रभुश्चूर्णक्षेपं कुर्वन्सुमेधसाम् । तेषां सूत्रेण चार्थेन ततस्तदुभयेन च ॥ ९६ ॥**

**क्रमाद्द्रव्यैरथ गुणैः पर्यायैश्च नयैरपि । अनुज्ञामनुयोगस्य गणस्य च ददौ तदा ॥ ९७ ॥ युग्मं ॥**

अन्वयः-अथ प्रभुः उत्थाय तेषां सुमेधसां चूर्ण क्षेपं कुर्वन्, सूत्रेण च अर्थेन, ततः च तत् उभयेन, ॥ ९६ ॥ क्रमात् द्रव्यैः, अथ गुणैः, च पर्यायैः, अपि नयैः तदा अनुयोगस्य च गणस्य अनुज्ञां ददौ. ॥ ९७ ॥ युग्मं ॥

अर्थः-पछी प्रभुए उभा थइने ते उत्तम बुद्धिवान गणधरोना ( मस्तकोपर ) वासक्षेप करतांथकां, सूत्रथी, अर्थथी, तथा पछी ते बन्नेथी, ॥ ९६ ॥ अनुक्रमे द्रव्योवडे, तथा गुणोवडे, तथा पर्यायोवडे, तथा नयोवडे ते समये अनुयोगनी तथा गणनी अनुज्ञा आपी. ॥ ९७ ॥ युग्मं ॥

अथ दुन्दुभिनिर्घोषैर्मङ्गलोद्गारगीतिभिः । सुरासुरनरा हर्षात्तेषु वासांश्च चिक्षिपुः ॥ ९८ ॥

अन्वयः— अथ दुंदुभि निर्घोषैः, मंगल उद्गार गीतिभिः सुर असुर नराः च हर्षात् तेषु वासान् चिक्षिपुः.॥ ९८ ॥

अर्थः—पछी दुंदुभिओना नादो, तथा मंगलिकना गीतोसहित देवो, दानवो तथा मनुष्योए ते गणधरोपर वासक्षेप कर्यो. ॥९८॥

पुनः सिंहासनासीनः पुरःस्थानां जगद्गुरुः । मुनीन्द्राणामदात्तत्त्वशिक्षां गणधरोचिताम् ॥ ९९ ॥

अन्वयः–पुनः सिंहासन आसीनः जगत् गुरुः, पुरःस्थानां मुनि इंद्राणां गणधर उचितां तत्त्व शिक्षां अदात्. ॥ ९९ ॥

अर्थः—पछी सिंहासनपर बेठेला प्रभुए आगळ उभेला ते मुनींद्रोने गणधर योग्य तत्वोनी शिखामण आपी. ॥ ९९ ॥

तस्मिन्नवसरे स्थूलैरुज्ज्वलैः शालितण्डुलैः । अखण्डैराढकोन्मानैर्निर्मितः कृत्यवेदिभिः ॥ ११०० ॥

गन्धद्रव्यैः सुरन्यस्तैः प्रचुरीभूतसौरभः । सुरनरोदश्चितः क्ष्मापवसुपूज्येन कारितः ॥ १ ॥

वाद्येषु वाद्यमानेषु गायति प्रमदाजने । द्वारा प्राच्येन समवसरणे प्राविशद्बलिः ॥ २ ॥

अन्वयः–तस्मिन् अवसरे स्थूलैः, उज्ज्वलैः, अखंडैः, आढक उन्मानैः शालि तंडुलैः कृत्य वेदिभिः निर्मितः, ॥ ११०० ॥ सुरन्यस्तैः गंध द्रव्यैः प्रचुरी भूत सौरभः, सुर नर उदंचितः, क्ष्माप वसुपूज्येन कारितः, ॥ १ ॥ बलिः वाद्येषु वाद्यमानेषु, प्रमदा जने गायति प्राच्येन द्वारा समवसरणे प्राविशत्. ॥ २ ॥ त्रिभिर्विशेषकं ॥

अर्थः—ते समये जाडा, उज्ज्वल, अखंड, अने आढकजेटला प्रमाणवाळा शालना चावलोथी ते कार्यने जाणनाराओए बनावेलो ॥ ११०० ॥ देवोए नाखेली सुगंधी वस्तुओथी अति सुगंधी थयेलो, देवो तथा मनुष्योए उंचकेलो तथा वसुपूज्य राजाए करावेलो, ॥ १ ॥ बलि, वाजित्रो वागते छते, तथा स्त्रीओ गीत गाते छते, पूर्वतरफना दरवाजेथी समवसरणमां दाखल थयो. ॥ २ ॥

**दत्तप्रदक्षिणो भर्तुरुत्क्षिप्तः स पुरो नृभिः । श्रेयःश्रीनर्तनारम्भे पुष्पहस्तकवद्बभौ ॥ ३ ॥**

अन्वयः—भर्तुः दत्त प्रदक्षिणः, नृभिः पुरः उत्क्षिप्तः सः श्रेयः श्री नर्तन आरंभे पुष्पहस्तकवत् बभौ. ॥ ३ ॥

अर्थः—प्रभुने प्रदक्षिणा देवापूर्वक मनुष्योए आगळ उछाळेलो ते बलि कल्याणलक्ष्मीना नाटकना प्रारंभ समये पुष्पोनी वृष्टि सरखो शोभवा लाग्यो. ॥ ३ ॥

**अपतन्तं महोपीठे बलेरर्धं दिवौकसः । जगृहुः सुगुरोर्वाक्यमिव भक्तिपरा नराः ॥ ४ ॥**

अन्वयः—भक्ति पराः नराः सुगुरोः वाक्यं इव, मही पीठे अपततं बलेः अर्ध दिव ओकसः जगृहुः. ॥ ४ ॥

अर्थः—भक्तिवंत मनुष्यो जेम सुगुरुना वचनने ग्रहण करे, तेम पृथ्वीतळपर नही पडेलो एवो ते बलिनो अर्ध भाग देवोए ग्रहण कर्यो. ॥ ४ ॥

**पतितस्य क्षितौ तस्यार्धस्यार्धं जगृहे नृपः । तीर्थशेषामिवाल्पाल्पं शेषं तु जगृहुर्जनाः ॥ ५ ॥**

अन्वयः–क्षितौ पतितस्य तस्य अर्धस्य अर्धं नृपः जगृहे, शेषं तु अल्पं अल्पं जनाः तीर्थशेषां इव जगृहुः. ॥ ५ ॥

अर्थः–पृथ्वीपर पडेला (बाकीना) अर्ध बलिमांथी अर्ध राजाए लीधो, अने बाकी रहेला चोथा भागमांथी थोडो थोडो मनुष्योए तीर्थनी शेषानी पेठे ग्रहण कर्यो. ॥ ५ ॥

**बलेस्तस्य प्रभावेण पूर्वोत्पन्ना गदाः क्षणात् । विलीयन्ते न जायन्ते षण्मासान्तर्नवाः पुनः ॥ ६ ॥**

अन्वयः–तस्य बलेः प्रभावेण पूर्व उत्पन्नाः गदाः क्षणात् विलीयंते, पुनः नवाः षण् मासांतः न जायंते. ॥ ६ ॥

अर्थः–ते बलिना माहात्म्यथी पूर्वे उत्पन्न थयेला रोगो क्षणवारमां नाश पामे छे, अने नवा रोगो छ मासनी अंदर थता नथी.

**मातुलिङ्गशराधारौ धारयन्दक्षिणौ भुजौ । वामौ नकुलकोदण्डदण्डाभ्याममिमण्डयन् ॥ ७ ॥**
**अवलक्षरुचिर्यक्षो वलक्षखगवाहनः । कुमारनामा तीर्थेऽस्मिन्वासुपूज्यविभोरभूत् ॥ ८ ॥**

अन्वयः—मातुलिंग शर आधारौ दक्षिणौ भुजौ धारयन्, नकुल कोदंड दंडाभ्यां वामौ अभिमंडयन्, ॥ ७ ॥ अवलक्ष रुचिः, वलक्ष खग वाहनः, कुमारनामा यक्षः वासुपूज्य विभोः अस्मिन् तीर्थे अभूत्. ॥ ८ ॥ युग्मं ॥

अर्थः—बीजोरुं अने बाण धरनारां जमणा बे हाथवाळो, तथा नोळीयुं अने धनुर्दंडवडे डाबा बन्ने हाथोने शोभावतो, ॥ ७ ॥ श्वेत कांतिवाळो, अने हंसना वाहनवाळो कुमार नामनो यक्ष ते श्रीवासुपूज्य प्रभुना आ तीर्थमां (अधिष्ठायक) थयो. ॥८॥ युग्मं ॥

उत्पेदे च घनश्यामा चण्डानामा तुरङ्गगा । दक्षिणौ दधतो शक्तिवरदत्ववरौ करौ ॥ ९ ॥
भुजौ वामौ गदापुष्पभूषितौ परिबिभ्रती । सदा संनिहिता भर्तुर्जाता शासनदेवता ॥ १० ॥

अन्वयः–घन श्यामा च तुरंग गा, शक्ति वरदत्व वरौ दक्षिणौ करौ दधती, गदा पुष्प भूषितौ वामौ भुजौ परिबिभ्रती, भर्तुः सदा संनिहिता जाता चंडानामा शासन देवता उत्पेदे. ॥ ९ ॥ १० ॥ युग्मं ॥

अर्थः—मेघसरखा श्याम रंगवाळी, घोडापर बेठेली, भालुं तथा वरदानथी शोभता बन्ने जमणा हाथने धारण करती, तथा गदा अने पुष्पथी शोभता बन्ने डाबा हाथवाळी, तथा हमेशां प्रभुनी पासे रहेनारी चंडानामनी शासनदेवी थइ. ॥ ९ ॥ १० ॥ युग्मं ॥

अथोत्थायोत्तरद्वारा निर्गत्य स्वर्गिभिर्वृतः । देवच्छन्दे जिनो हंस इव व्यश्राम्यदम्बुजे ॥ ११ ॥

अन्वयः–अथ स्वर्गिभिः वृतः जिनः उत्थाय, उत्तर द्वारा निर्गत्य हंसः अंबुजे इव देवच्छंदे व्यश्राम्यत्. ॥ ११ ॥

अर्थः—पछी देवोथी वींटायेला प्रभु (त्यांथी) उठीने, अने उत्तरतरफने दरवाजेथी निकळीने हंस जेम कमलपर बेसे, तेम देवच्छंदमां विश्राम लेवा बेठा. ॥ ११ ॥

प्रभोरनुज्ञामासाद्य प्रतिपद्य जिनस्तुतिम् । उपविष्टेषु शेषेषु मुनीन्द्रेषु यथाक्रमम् ॥ १२ ॥
तदार्हदंघ्रिपीठस्थः सूक्ष्मो गणधराग्रणीः । विश्वलोकमनःप्रीत्यै प्रतेने धर्मदेशनाम् ॥ १३ ॥

अन्वयः—प्रभोः अनुज्ञां आसाद्य, जिन स्तुतिं प्रतिपद्य, शेषेषु मुनि इंद्रेषु यथाक्रमं उपविष्टेषु, ॥ १२ ॥ तदा अर्हत् अंघ्रिपीठ स्थः सूक्ष्मः गणधर अग्रणीः विश्वलोक मनः प्रीत्यै धर्म देशनां प्रतेने. ॥ १३ ॥ युग्मं ॥

अर्थः—पछी प्रभुनी आज्ञा लेइने, तथा प्रभुनी स्तुति करीने, बाकीना बीजा मुनींद्रो अनुक्रमे बेसते छते, ॥ १२ ॥ ते समये प्रभुना पादपीठपर बेसीने सूक्ष्म नामना गणधरेंद्र जगतना लोकोना मनने आनंद आपवाने धर्मदेशना देवा लाग्या. ॥ १३ ॥

सर्वज्ञवाक्यघनसारलवानुकार—माबिभ्रतीमुपशमामृतपुष्पवृष्टिम् ।
आकर्ण्य कर्णसुभगां प्रभुशिष्यवाचं । वाचंयमान्निभृतभक्तिभरेण नत्वा ॥ १४ ॥

आह्लादनस्त्रिजगतां जयतादनर्घ्यः । श्रीसङ्घ एष जिननाथकृतप्रतिष्ठः ।
इत्याशिषं वदनचन्द्रमरीचिशस्तां । विस्तारयन्निव निजं निलयं जनोऽगात् ॥ १५ ॥ युग्मम् ॥

अन्वयः—सर्वज्ञ वाक्य घनसार लव अनुकारं आबिभ्रतीं, उपशम अमृत पुष्प वृष्टिं, कर्ण सुभगां, प्रभु शिष्य वाचं आकर्ण्य, निभृत भक्ति भरेण वाचंयमान् नत्वा, ॥ १४ ॥ त्रिजगतां आह्लादनः, जिन नाथ कृत प्रतिष्ठः एषः अनर्घ्यः श्रीसंघः जयतात्, इति वदन चंद्र मरीचि शस्तां आशिषं विस्तारयन् इव जनः निजं निलयं अगात्. ॥ १५ ॥ युग्मं ॥

अर्थः—प्रभुनां वचनरूपी बरासना लवनुं अनुकरण करनारी, तथा शांतिरूपी अमृतयुक्त पुष्पोनी वृष्टिसरखी अने कर्णोने आनंद

आपनारी, प्रभुना ते शिष्यनी वाणी सांभळीने, अति भक्तिना समूहथी मुनिओने नमीने, ॥ १४ ॥ त्रणे जगतने आनंद आपनारो, तथा तीर्थंकरप्रभुए स्थापेलो आ अनुपम श्रीसंघ जय पामो ?, एम मुखचंद्रमांथी निकळतां किरणोसरखी जाणे मनोहर आशीष विस्तारताथका लोको पोत पोताने घेर गया. ॥ १५ ॥ युग्मं ॥

**इति दण्डाधिपतिश्रीमदाह्लादनसमभ्यर्थितश्रीविजयसिंहसूरिशिष्यश्रीवर्धमानसूरिविरचिते श्रीवासुपूज्यचरिते आह्लादनाङ्के महाकाव्ये चतुःकल्याणकलब्धिवर्णनो नाम तृतीयः सर्गः ॥**

ए रीते दंडाधिपति श्रीमान् आह्लादने प्रार्थना करेला, अने श्रीविजयसिंहसूरिजीना शिष्य एवा श्रीवर्धमानसूरिजीए रचेला श्रीवासुपूज्य चरित्रनामना आह्लादनना चिह्नवाळा महाकाव्यमां चार कल्याणकोनी प्राप्तिना वर्णन नामनो त्रीजो सर्ग समाप्त थयो. ॥ श्रीरस्तु ॥

**॥ इति श्रीवर्धमानसूरिविरचिते वासुपूज्यचरित्रे षष्ठो भागः समाप्तः ॥ श्रीरस्तु ॥ आ ग्रंथना अन्वय तथा गुजराती भाषांतर जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेय माटे करी, पोताना श्री जैनभास्करोदय प्रेसमां छापी प्रसिद्ध करेल छे.**

॥ इति श्रीवासुपूज्यचरित्रे षष्ठो भागः समाप्तः ॥